
# छात्राध्ययन–सहायक सामग्री

## सत्र : 2019–20

तत् त्वं पूषन् अपावृणु

केन्द्रीय विद्यालय संगठन




## कक्षा – 12

# संस्कृतम्

# छात्राध्ययन-सहायक-सामग्री
# कक्षा - द्वादशी
# संस्कृतम्

तत् त्वं पूषन् अपावृणु

केन्द्रीय विद्यालय संगठन

**सत्र- 2019-20**

केन्द्रीय-विद्यालय-संगठनम्,नव देहली

संतोष कुमार मल्ल, भा.प्र.से.
आयुक्त
Santosh Kumar Mall, I.A.S.
Commissioner

तत् त्वं पूषन् अपावृणु
केन्द्रीय विद्यालय संगठन

केन्द्रीय विद्यालय संगठन
KENDRIYA VIDYALAYA SANGATHAN
18, संस्थागत क्षेत्र, शहीद जीत सिंह मार्ग, नई दिल्ली–110016
दूरभाष : 91–11–26512579, फैक्स : 91–11–26852680
18, Institutional Area, Shaheed Jeet Singh Marg, New Delhi-110016 (India)
Tel. : 91-11-26512579, Fax : 91-11-26852680
E-mail : commissioner@kvsedu.org, Website : www.kvsangathan.nic.in

## A WORD TO MY DEAR STUDENTS

It gives me great pleasure in presenting the Students' Support Material to all KV students of class XII.

The material has been prepared keeping in mind your needs when you are preparing for final exams and wish to revise and practice questions or when you want to test your ability to complete the question paper in the time allotted or when you come across a question while studying that needs an immediate answer but going through the text book will take time or when you want to revise the complete concept or idea in just a minute or try your hand at a question from a previous CBSE Board exam paper or the Competitive exam to check your understanding of the chapter or unit you have just finished. This material will support you in any way you want to use it.

A team of dedicated and experienced teachers with expertise in their subjects has prepared this material after a lot of exercise. Care has been taken to include only those items that are relevant and are in addition to or in support of the text book. This material should not be taken as a substitute to the NCERT text book but it is designed to supplement it.

The Students' Support Material has all the important aspects required by you; a design of the question paper, syllabus, all the units/chapters or concepts in points, mind maps and information in tables for easy reference, sample test items from every chapter and question papers for practice along with previous years Board exam question papers.

I am sure that the Support Material will be used by both students and teachers and I am confident that the material will help you perform well in your exams.

Happy learning!

28/10

**Santosh Kumar Mall**
Commissioner, KVS

# FOREWORD

The Students' Support Material is a product of an in-house academic exercise undertaken by our subject teachers under the supervision of subject expert at different levels to provide the students a comprehensive, yet concise, learning support tool for consolidation of your studies. It consists of lessons in capsule form, mind maps, concepts with flow charts, pictorial representation of chapters wherever possible, crossword puzzles, question bank of short and long answer type questions with previous years' CBSE question papers.

The material has been developed keeping in mind latest CBSE curriculum and question paper design. This material provides the students a valuable window on precise information and it covers all essential components that are required for effective revision of the subject.

In order to ensure uniformity in terms of content, design, standard and presentation of the material, it has been fine tuned at KVS Hqrs level.

I hope this material will prove to be a good tool for quick revision and will serve the purpose of enhancing students' confidence level to help them perform better. Planned study blended with hard work, good time management and sincerity will help the students reach the pinnacle of success.

Best of Luck.



**U.N. Khaware**
Additional Commissioner (Acad.)

Sanskrit

# STUDENT SUPPORT MATERIAL

## ADVISORS

**Shri Santosh Kumar Mall, IAS, Commissioner,**
**KVS (HQ), New Delhi**

| | |
|---|---|
| **Sh. Saurabh Jain, IAS**<br>**Additional. Commissioner (Admn.)**<br>**KVS (HQ), New Delhi.** | **Sh. U.N Khaware,**<br>**Additional. Commissioner (Acad)**<br>**KVS (HQ), New Delhi.** |

## CO-ORDINATION TEAM KVS (HQ)

- Dr.E. Prabhakar, Joint Commissioner (Training/Finance) KVS (HQ), New Delhi.
- Smt. InduKaushik, Deputy Commissioner (Acad), KVS (HQ), New Delhi.
- Shri Ravindra Kumar Sharma, Assistant Education Officer, KVS (HQ), New Delhi.

## CONTENT TEAM

- श्री ए.वि.एल्.जे. राओ
- उपायुक्तः, भुवनेश्वर-संभागः
- श्री अशोक कुमार मिश्रः
- प्राचार्यः, केन्द्रीय विद्यालयः-१ ,कटकम्
- श्री बासुदेव मिश्रः ,केन्द्रीय विद्यालयः-१ कटकम्
- श्री कैलास चन्द्र नन्दः,केन्द्रीय विद्यालयः-१ कटकम्

## REVIEW TEAM

- ShriA.V.L.J.Rao, Deputy Commissioner, Bhubaneswar Region.
- Shri Ashok Mishra, Principal, KV.1 Katkam.
- ShriSomdatta, TGT (Sanskrit),KV No.1 Sambalpur.
- ShriU.C.Das, TGT (Sanskrit) KV No.3 Bhubaneswar.
- Shri B. Mishra, TGT(Sanskrit) KV No.1 Cuttack.
- ShriBasudevMishr, KV No.1 Katakam.
- ShriKailashChandrNand,KV No.1 Katakam.

**Typing, Type-setting & Designing**
**M/s Choudhary Printing Press**
Near Mohanpur Devi Asthan, Punaichak, Patna-800 023
Mob.: 0943096087, 09835492012 T/F: 0612-2546751
E-mail: choudharyprintingpress@gmail.com

# विषयानुक्रमणिका

संस्कृतम् (केन्द्रिकम्-322)

पाठ्यक्रमः परीक्षानिर्देशाश्च(2019-2020)

अवधिः-होरात्रयम् पूर्णाङ्काः=80+20=100

अस्मिन् प्रश्नपत्रे चत्वारः भागाः भविष्यन्ति।

| | | अङ्काः |
|---|---|---|
| भागः "क" | अपठित-अवबोधनम् | 10 |
| भागः "ख" | रचनात्मककार्यम् | 15 |
| भागः "ग" | अनुप्रयुक्त व्यकरणम् | 20 |
| भागः "घ" | पठित-अवबोधनम् | 25 |
| | संस्कृतसाहित्येतिहासस्य परिचयः | 10 |
| भागः "ङ" | आन्तरिक-मूल्याङ्कनम् | 20 |

<u>विस्तृत विवरणम्</u>

**भागः "क"** **अपठित-अवबोधनम्** **10 अङ्काः**

80-100 शब्दपरिमितः एकः सरलः अपठितः गद्यांशः।

| | |
|---|---|
| i) एकपदेन उत्तरम् | 2 |
| ii)पूर्णवाक्येन उत्तरम् | 4 |
| iii)वाक्ये कर्तृक्रिया-पदचयनम्,विशेष्य,विशेषण,पर्याय, विलोमपद चयनम्,सर्वनामस्थाने संज्ञाशब्दप्रयोगः | 3 |
| iv) समुचितशीर्षक लेखनम् | 1 |

**भागः "ख"** **रचनात्मककार्यम्** **15 अङ्काः**

| | |
|---|---|
| i) पत्रलेखनम्(औपचारिक ,अनौपचारिक,प्रार्थनापत्रम्,) | 5 |
| ii) लघुकथा/वार्तालापे रिक्तस्थान पूरणम् | 5 |
| iii) सङ्केताधारितम् अनुच्छेदलेखनम्/संस्कृतभाषया अनुवादकार्यम् | 5 |

**भागः "ग"** **अनुप्रयुक्त व्याकरणम्** **20 अङ्काः**

| | | |
|---|---|---|
| i)पाठाधारिताः सन्धिविच्छेदाः(स्वर-व्यञ्जन-विसर्गादयः) | 2+2+2= | 6 |
| ii)पाठाधारित-समासाःविग्रहाः च (अव्ययीभावः, द्विगुः , द्वन्द्वः , तत्पुरुषः , कर्मधारयः , बहुव्रीहिश्च) | | 5 |

| | |
|---|---|
| iii)प्रत्ययाः- (क्त,क्तवतु,तव्यत्, अनीयर् ,शतृ,शानच्,क्तिन् मतुप्, इन्,ठक्,ठञ्,त्व,तल्,टाप्,ङीप्) | 6 |
| iv)उपपदविवक्तिप्रयोगः | 3 |
| **भागः "घ" पठित-अवबोधनम्** | **25 अङ्काः** |
| 1)एकः गद्यांशः | 5 |
| 2)एकः पद्यांशः | 5 |
| 3)एकः नाट्यांशः | 5 |
| i)एकपदेन उत्तरम् | 1 |
| ii)पूर्णवाक्येन उत्तरम् | 2 |
| भाषिक-कार्यम्- | 2 |
| i)वाक्ये कर्तृक्रिया-पदचयनम् | |
| ii)विशेष्य,विशेषण,पर्याय, विलोमपद चयनम् | |
| iii)सर्वनामस्थाने संज्ञाशब्दप्रयोगः | |
| 4)भावार्थ लेखनम्/शुद्धभावार्थ चयनम् | 3 |
| 5)अन्वयेषु रिक्तस्थान पूर्तिः | 3 |
| 6)प्रदत्तवाक्यानां सार्थकमेलनम् | 2 |
| 7)प्रसङ्गानुसारं पदानाम् अर्थलेखनम् | 2 |
| | |
| **भागः "ङ" संस्कृतसाहित्येतिहासस्य परिचयः** | **10अङ्काः** |
| i)पाठ्यपुस्तके सङ्कलितपाठ्यांशानां कवीनाम् परिचयः | 3 |
| ii)गद्य -पद्य-नाटकादिविधानां मुख्यविशेषतानां परिचयः | 3 |
| iii)गद्यकाव्यम्,पद्यकाव्यम्,चम्पुकाव्यम् | 4 |
| भागः "ङ" आन्तरिक-मूल्याङ्कनम्- | 20अङ्काः |
| i)परियोजना कार्यम् | 10 |
| ii)गतिविधयः | 10 |

**मूल्याङ्कनबिन्दवः**

मौलिकता
विषयसम्बद्धता
शुद्धता
समयबद्धता
प्रस्तुतिकरणम्

# पाठ्यविषयाः


- प्रथमः पाठः - अनुशासनम्
- द्वितीयः पाठः - न त्वं शोचितुमर्हसि
- तृतीयः पाठः - मातुराज्ञा गरीयसी
- चतुर्थः पाठः - प्रजानुरञ्जकः नृपः
- पञ्चमः पाठः - दौवारिकस्य निष्ठा
- षष्ठः पाठः - सूक्ति -सौरभम्
- सप्तमः पाठः - नैकेनापि समं गता वसुमती
- अष्टमः पाठः - हल्दीघाटी
- नवमः पाठः - मदालसा
- दशमः पाठः - प्रतीक्षा

# १ . अपठित-अवबोधनम्

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

सतां संगति: सत्सङ्गति:इति कथ्यते । ये सज्जना: साधव: सन्ति , तेषां संगत्या मनुष्य: सज्जन: साधु:शिष्टश्च भवति । ये दुर्जना: सन्ति तेषां सङ्गत्यामनुष्य: दुर्जन: भवति । दुर्जनसंगत्या मनुष्य: विनाशं प्राप्नोति । ये सज्जनै: सह उपविशन्ति उत्तिष्ठन्ति खादन्ति पिबन्ति च , ते तथैव स्वभावं धारयन्ति । मनुष्यस्य उपरि संगते: महान् प्रभाव: भवति ।स: यादृशै: पुरुषै: सह निवसति, तादृश: एव भवति । सज्जनानां संगत्या मनुष्य: उन्नतिं प्राप्नोति । असतां संसर्गेण नर: असद्वृत्त: भवति ।अत: सत्सङ्गति: जनानां मङ्गलाय भवति।

I.एकपदेन उत्तरत –

(i) कस्य उपरि संगते: महान् प्रभाव: भवति ?

(ii) असतां संसर्गेण क: असद्वृत्त: भवति ?

(iii) सतां संगति: काइति कथ्यते ?

(iv) सत्सङ्गति: केषां मङ्गलाय भवति ।

II.पूर्णवाक्येन उत्तरत –

(i) केषां सङ्गत्या मनुष्य: दुर्जन: भवति ?

(ii) केषां संसर्गेण नर: असद्वृत्त: भवति ?

III.निर्देशानुसारं उत्तरत –

(i) 'दुर्जन:' इति पदस्य विलोमपदं किम् ?

(ii) 'महान् प्रभाव:' इति पदयो: विशेषणपदं किम् ?

(iii) "मानवस्य" इति अर्थे अत्र किं पदं प्रयुक्तम् ?

(iv) "दुर्जनसंगत्या मनुष्य: विनाशं प्राप्नोति "। इति वाक्ये क्रियापदं किम् ?

IV.अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत ।

# २ . अपठित-अवबोधनम्

2. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत-

एषः वर्षाकालः। वर्षाकाले आकाशे मेघाः भवन्ति। सूर्यस्य दर्शनं प्रतिदिनं न भवति। सूर्यः मेघैः आच्छादितः भवति। आकाशात् जलबिन्दवः पतन्ति। वृक्षेषु नवपल्लवाः विकसन्ति। पशवः पक्षिणः च वर्षाजलं पीत्वा प्रसन्नाः भवन्ति। मण्डूकाः शब्दं कुर्वन्ति। मयूराः मेघगर्जनं श्रुत्वा वने नृत्यन्ति। नानाविधानि पुष्पाणि विकसन्ति। सर्वत्र सुगन्धः भवति। मार्गेषु कर्दमाः भवन्ति। नदीषु जलं वहति। जलाशयाः जलेन पूर्णाः

भवन्ति। कृषकाः कृषिकार्यं कुर्वन्ति। ते क्षेत्राणि हलेन कर्षन्ति। सर्वत्र क्षेत्रेषु वृक्षाः लताः च प्ररोहन्ति। यथा स्वल्पजलपातेन जनानां हानिः भवति तथैव अधिकजलपातेन अपि हानिः भवति।

I. एकपदेनउत्तरत-

(i) कर्दमाः कुत्र भवन्ति ?

(ii) मेघगर्जनं श्रुत्वा मयूराः कुत्र नृत्यन्ति ?

(iii) के कृषिकार्यं कुर्वन्ति ?

(iv) मण्डूका: किं कुर्वन्ति ?

II. पूर्णवाक्येन उत्तरत-

(i) कदा आकाशे मेघा: भवन्ति ?

(ii) मेघगर्जनं श्रुत्वा मयूराः किं कुर्वन्ति ?

III. निर्देशानुसारं उत्तरत –(i) 'खगाः' इति पदस्य अत्र किं समानार्थकं पदं प्रयुक्तम् ?

(ii) 'पतन्ति' इति क्रियापदस्य कः कर्ता ?

(iii) 'मयूराः मेघगर्जनं श्रुत्वा वने नृत्यन्ति ।' इति वाक्ये क्रियापदं किम् ?

(iv) 'सुगन्धः' इति पदस्य विलोमपदं किम् ?

IV.अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत ।

## ३ . अपठित-अवबोधनम्

3. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्ननाम् उत्तराणि लिखत-

अस्माकं भारत देश: एकं गणतान्त्रिकं राष्ट्रम् अस्ति । अत्र देशे प्रतिपञ्चवर्षानन्तरं लोकसभाया: निर्वाचनं भवति । लोकसभाया: निर्वाचने जना: प्रत्यक्षतया भागं गृह्णन्ति । 2019 ख्रिष्टाब्दे अप्रैल-मई-मासयो: भारते सप्तदशतमाया: लोकसभाया: निर्वाचनम् अभवत् । एतत् निर्वाचनं सप्तचरणेषु अभवत् । निर्वाचनं प्रायश: शान्तिपूर्णम् आसीत्। द्विचत्वारिंशत् अधिकं पञ्चशतं स्थानानां कृते निर्वाचनं जातम्। राष्ट्रीय-जनतान्त्रिक-गठबन्धनेन त्रिपञ्चाशत् अधिकं त्रिशतं स्थानानि प्राप्तानि । केवलं भारतीय जनता दलेन त्र्यधिकं त्रिशतं स्थानानि प्राप्तानि । राष्ट्रीय-जनतान्त्रिक-गठबन्धनस्य विजये मुख्यकारणम् प्रधानमन्त्री श्री नरेन्द्रमोदी-महोदयस्य लोकप्रियता विद्यते । अस्मिन् निर्वाचने कांग्रेसदलेन केवलं द्विपञ्चशत् स्थलेषु विजयं लब्धम् । अत्र लोकसभाया: अध्यक्षरूपेण 'ओम् विडला' महोदय: निर्विरोधं स्वीकृत: ।

I.एकपदेन उत्तरत –

(i) कांग्रेसदलेन कति स्थलेषु विजयं लब्धम् ?

(ii) लोकसभाया: निर्वाचने के प्रत्यक्षतया भागं गृह्णन्ति ?

(iii) अस्माकं भारतदेश: एकं कीदृशं राष्ट्रम् अस्ति ?

(iv) कुत्र सप्तदशतमाया: लोकसभाया: निर्वाचनम् अभवत् ?

II.पूर्णवाक्येन उत्तरत-

(i) लोकसभाया: निर्वाचनं कति वर्षानन्तरं भवति ?

(ii) एतत् निर्वाचनं कतिचरणेषु अभवत् ?

III.निर्देशानुसारम् उत्तरत -

(i)“लोकसभाया: निर्वाचने जना: प्रत्यक्षतया भागं गृह्णन्ति ।” अत्र क्रियापदं किम् अस्ति?

(ii) ‘अशान्तिपूर्णम्’इति पदस्य विलोमपदं किम् अत्र वर्णितम् ?

(iii) निर्वाचनं प्रायश: शान्तिपूर्णम् आसीत् अत्र विशेष्यपदं किं अस्ति ?

(iv) लोकसभाया: निर्वाचने जना: प्रत्यक्षतया भागं गृह्णन्ति। इति वाक्ये कर्तृपदं किम् अस्ति?

IV.अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत ।

## ४ . अपठित-अवबोधनम्

4. अधोलिखतम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत -

महर्षे : उद्दालकस्य विशाल : आश्रम : तमसानद्या :तीरे आसीत् । पञ्चषा :ऋषय , :अनेके शिष्या :च तत्र वसन्ति स्म । वेदानां शास्त्राणां च अध्ययनं तत्र सततं प्रवर्तते स्म । सर्वेषु शिष्येषु महर्षे :इष्टतम :खगोदर :। तं सर्वे प्रीत्या कहोड :इति आह्वयन्ति स्म । एकदा कहोड :वेदं सम्यक्तया अपठत् । तदनन्तरं स :गोशालां मार्जयित्वा गोभ्य :हरितानि तृणानि अयच्छत् । स :सर्वदा गुरो :आज्ञाम् पालयति स्म ।

I. एकपदेन उत्तरत -

(क) कहोड : सर्वदा कस्य आज्ञां पालयति स्म ?

(ख) क :गोभ्य :हरितानि तृणानि अयच्छत् ?

(ग) कस्य आश्रम: तमसानद्या: तीरे आसीत् ?

(घ) कति शिष्या :च तत्र वसन्ति स्म ?

II.पूर्णवाक्येन उत्तरत -

(क) महर्षे :उद्दालकस्य विशाल :आश्रम :कुत्र आसीत् ?

(ख) केषाम् अध्ययनं तत्र सततं प्रवर्तते स्म ?

III.निर्देशानुसारम् उत्तरत –

(क) विशाल :आश्रम :इति पदयो :विशेषणम् पदं किम् अस्ति ?

(ख) एकदा कहोड : वेदं सम्यक्तया अपठत् । अस्मिन् वाक्ये कर्त्ता क: ?

(ग) अत्र कूले इत्यर्थे किं पदं प्रयुक्तम् ?

(घ)‘ तदनन्तरं स :गोशालां मार्जयित्वा गोभ्य :हरितानि तृणानि अयच्छत् ’ इति वाक्ये स: इति सर्वनामपदं कस्मै प्रयुक्तम् ?

IV.अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत ।

## ५ . अपठित-अवबोधनम्

5. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानामुत्तराणि लिखत -

अस्मिन्संसारे मानवजीवनं दुर्लभम् अस्ति। किन्तु मानवजन्म गृहीत्वा अपि मानव: समयस्य महत्वं न जानाति। मानवजीवने समयस्य बहुमहत्त्वं वर्तते। संसारे विनष्टानि वस्तूनि पुन: लब्धुं शक्यन्ते परं विनष्ट: काल: पुन: परिवर्तयितुं न शक्यते। य: काल: निरर्थकंगत: स: गत: एव। मानवै: तथायत्न: कर्तव्य: यथा एकस्यापि क्षणस्य दुरूपयोग: नस्यात्। अत्र एवं कथयन्ति यत् श्व:कार्यम् अद्य एव करणीयम्। अद्यकार्यम् इदानीम् करणीयम्। अलसा: जना: वर्तमानसमयस्य दुरुपयोगं कुर्वन्ति। तेन ते जीवने असफला: एव भवन्ति। अत: सर्वथा सर्वदैव समयानुसारं कार्यं कुर्यात्।

I .एकपदेनउत्तरत -

(i) संसारे किं दुर्लभम् अस्ति ?

(ii) मानव: कस्य महत्त्वं न जानाति स्म ?

(iii) अत: सर्वथा सर्वदैव समयानुसारं किं कुर्यात्?

(iv) के वर्तमानसमयस्य दुरुपयोगं कुर्वन्ति?

II. एकवाक्येनउत्तरत -

(i) मानवै: कथंयत्न: कर्तव्य:?

(ii) अलसा: जना: कस्य दुरुपयोगं कुर्वन्ति ?

III.निर्देशानुसारमुत्तरत -

(i)'काल:' इतिपदस्यविशेषणपदंकिम् ?

(ii)'उद्यम:' इतिपदस्यकृतेकिंपर्यायपदंप्रयुक्तम् ?

(iii) 'दुरुपयोगं ' इति पदस्य विलोमपदं किम् ?

(iv)'अत: सर्वथा सर्वदैव समयानुसारं कार्यं कुर्यात्'इति वाक्ये क्रियापदं किम् ?

IV.अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।

## 6. अपठित-अवबोधनम्

6. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानामुत्तराणि लिखत -

वने एक: विशाल: आम्रवृक्ष: आसीत्। तस्मिन्वृक्षेबहव: पक्षिण: वसन्तिस्म। तेषुएक: कोकिल: अपि आसीत्। अन्ये सर्वे पक्षिण: मिलित्वा "त्वंकृष्णवर्ण: असि" इति कोकिलस्य निन्दां कुर्वन्ति स्म। अत: कोकिल: दु:खित: अभवत्। कालक्रमेण वसन्त: ऋतु: आगत:। कोकिल: मधुरस्वरेण गायनम् अकरोत्। कोकिलस्य मधुरस्वरेण आकर्षिता: सर्वेपक्षिण: तस्य मित्राणि अभवन्। अत: कदापि अस्माभि: वर्णभेद: न कर्तव्य:। किन्तु गुणदृष्ट्या मित्रता सम्पादनीया। मानवानां कृते अपि एष: नियम: पालनीय:।

I.एकपदेनउत्तरत –

(i) कोकिलस्य निन्दां के कुर्वन्ति स्म?

(ii) कः मधुरस्वरेण गायनम् अकरोत् ?

(iii) कैः वर्णभेदः नकर्तव्यः ?

(iv) मानवानां कृते अपि कः पालनीयः ?

II. एकवाक्येनउत्तरत-

(i) पक्षिणः कोकिलस्य मित्राणि कथम् अभवन् ?

(ii) कोकिलः मधुरस्वरेणकिम्अकरोत् ?

III. निर्देशानुसारम् उत्तरत -

(i) ' खगाः'इति पदस्य कृते किं पर्यायपदं प्रयुक्तम् ?

(ii)'विशालः' इति विशेषणपदस्य विशेष्यपदं लिखत?

(iii)'वसन्तिस्म'इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

(iv)'प्रशंसा ' इति पदस्य कृते किं विलोमपदं अत्र प्रयुक्तम् ?

IV.अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत ।

## 7. अपठित-अवबोधनम्

7. अधोलिखितंगद्यांशंपठित्वाप्रश्नान्उत्तरत –

तस्य वचनम् अश्रद्धेयं मत्वा मदोद्धताः कपयः प्रहस्य अवदन् -"भो ! किमिदम् उच्यते ? न वयं स्वर्गसमानोपभोगान्विहाय अटव्यां क्षार-तिक्त-कषाय-कटु-रुक्षफलानि भक्षयिष्यामः"। तत्श्रुत्वा साश्रुनयनो यूथपतिः सगद्गदम् उक्तवान् – रसनास्वादलुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ। अहं तु वनं गच्छामि। अथ अन्यस्मिन् अहनि सो मेषो यावत्महानसं प्रविशति तावत्सूपकारेण अर्धज्वलितकाष्ठेन ताडितः। ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थां अश्वशालां प्रविशति दाहवेदनया च भूमौ लुठति। तस्य क्षितौ प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः ।

I. एकपदेनउत्तरत –

(i) साश्रुनयनोकः अभवत् ?

(ii) जाज्वल्यमानशरीरः मेषः कुत्र प्राविशत् ?

(iii) रसनास्वादलुब्धाः के आसन् ?

(iv) केषु वह्निज्वालाः समुत्थिताः ?

II.एकवाक्येनउत्तरत-

(i) मदोद्धताः कपयः प्रहस्य वानरयूथपतिं किम् अवदन् ?

(ii) कीदृशः मेषः अश्वशालां प्राविशत् ?

III. निर्देशानुसारम् उत्तरत -

(i)'त्यक्त्वा'इति पदस्य कृते किं पर्याय पदं प्रयुक्तम् ?

(ii)'ऊर्णाप्रचुर: मेष:'अनयो: पदयो किं विशेषणपदम् किम् ?

(iii)'अहं तु वनं गच्छामि' अत्र 'अहम्' इति सर्वनाम पदं कस्मै प्रयुक्तम् ?

(iv)'रात्रौ' इति पदस्य कृते किं विपरीत पदं अत्र किं प्रयुक्तम् ?

IV.अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।

## 8.अपठित-अवबोधनम्

8.अधोलिखितम् पद्यं पठित्वा प्रश्ननाम् उत्तराणि लिखत-

चिरकालं भवने चित्रविचित्रवस्तूनि सज्जितानि दृष्ट्वा बालिका विस्मयं गता। श्रान्तां तां विलोक्य काक: प्राह- पूर्वं लघुप्रातराश: क्रियताम् - वद त्वं स्वर्णस्थाल्यां भोजनं करिष्यसि किं वा रजतस्थाल्यामुत ताम्रस्थाल्याम् ? बालिका व्याजहार-ताम्रस्थाल्यामेवाहं निर्धना भोजनं करिष्यामि। तदा सा कन्या चाश्चर्यचकिता सञ्जाता यदा स्वर्णकाकेन स्वर्णस्थाल्यां भोजनं परिवेषितम्। नैतादृक् स्वादु भोजनमद्यावधि बालिका खादितवती। काको ब्रूते-बालिके! अहमिच्छामि यत्त्वं सर्वदा चात्रैव तिष्ठ परं तव माता वर्तते चैकाकिनी। त्वं शीघ्रमेव स्वगृहं गच्छ।

I.एकपदेन उत्तरत –

(i) सज्जितानि चित्रविचित्रवस्तूनि दृष्ट्वा का विस्मयं गता ?

(ii) स्वर्णकाकेन कस्यां भोजनं परिवेषितम् ?

(iii) का श्रान्ता आसीत् ?

(iv) बालिकाया: माता कीदृशी आसीत् ?

II.पूर्णवाक्येन उत्तरत् –

(i) नैतादृक् स्वादु भोजनमद्यावधि का खादितवती?

(ii) बालिकां शीघ्रं कुत्र गन्तुं स्वर्णकाक: कथयति ?

III.निर्देशानुसारम् उत्तरत –

(i) अत्र " विलोक्य" इति अर्थे किं पदं प्रयुक्तम् ?

(ii) 'त्वं शीघ्रमेव स्वगृहं गच्छ'। इति वाक्ये क्रियापदं किम् ?

(iii) निर्धना इति पदस्य समानार्थकं पदं किम् ?

(iv) तव माता वर्तते चैकाकिनी।अत्र तव इति पदं कस्यै प्रयुक्तम्?

IV.अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।

## 9. अपठित-अवबोधनम्

9. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

आदर्श: छात्र: अन्यछात्रै: अनुकरणीय: । स: गुरुभक्त: भवति । स: सदाचारी मधुरभाषी च भवति । आदर्श: छात्र: गृहकर्म अपि सोत्साहं करोति । स: सर्वदा सत्यं वदति । आदर्श: छात्र: कठिनं परिश्रमं कृत्वा स्वसमयस्य सदुपयोगं करोति । गुरूणां आदेशपालनं कृत्वा तेषां मार्गदर्शनेन उन्नतिं लभते । स: कदापि मिथ्या वदन्तम् अन्यछात्रं न सहते । यदा तस्य कृते समय: मिलति तदा स: आलस्यं विहाय उत्साहेन कार्यं करोति । अन्यै: छात्रै: सह तस्य सम्पर्क: मधुर: भवति ।

I.एकपदेन उत्तरत –

(i) आदर्श: छात्र: कै: अनुकरणीय: ?

(ii) स: कदा सत्यं वदति ?

(iii) क: मधुरभाषी भवति ?

(iv) कै: सह तस्य सम्पर्क: मधुर: भवति ?

II.पूर्णवाक्येन उत्तरत –

(i) आदर्श: छात्र: किम् अपि सोत्साहं करोति ?

(ii) आदर्श: छात्र:सर्वदा किम् वदति ?

III.निर्देशानुसारं उत्तरत –

(i)‘ स: सर्वदा सत्यं वदति ।’ इति वाक्ये क्रियापदं किम् ?

(ii) ‘सर्वदा’ इति पदस्य समानार्थकपदं किम् ?

(iii) ‘अन्यै: छात्रै:’ इति पदयो: विशेषणपदं किम् ?

(iv)‘ सदुपयोगं’ इति पदस्य विलोमपदं किम् ?

IV.अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत

## 10.अपठित-अवबोधनम्

10.अधोलिखितम् अनुच्छेदं पठित्वा प्रश्ननाम् उत्तराणि लिखत –

नैतादृश: स्वर्णपक्षो रजतचञ्चु: स्वर्णकाकस्तया पूर्वं दृष्ट: । तं तण्डुलान् खादन्तं हसन्तञ्च विलोक्य बालिका रोदितुमारब्धा । तं निवारयन्ती सा प्रार्थयत् - तण्डुलान् मा भक्षय । मदीया माता अतीव निर्धना वर्तते । स्वर्णपक्ष: काक: प्रोवाच, मा शुच: । सूर्योदयात्प्राग् ग्रामाद्बहि: पिप्पलवृक्षमनु त्वयागन्तव्यम् । अहं तुभ्यं तण्डुलमूल्यं दास्यामि । प्रहर्षिता बालिका निद्रामपि न लेभे । सूर्योदयात्पूर्वमेव सा तत्रोपस्थिता । वृक्षस्योपरि विलोक्य सा चाश्चर्यचकिता सञ्जाता यत्तत्र स्वर्णमय: प्रासादो विद्यते । यदा काक: शयित्वा प्रबुद्धस्तदा तेन स्वर्णगवाक्षात्कथितं हंहो बाले ! त्वमागता , तिष्ठ , अहं त्वत्कृते सोपानमवतारयामि , तत्कथय स्वर्णमयं रजतमयमुत ताम्रमयं वा ?

I. एकपदेन उत्तरत -

(i) ग्रामाद्बहि: क: आसीत् ?

(ii) प्रहर्षिता का निद्रामपि न लेभे ?

(iii) क: तण्डुलान् अखादत् ?

(iv) क: स्वर्णपक्ष: आसीत् ?

II.पूर्णवाक्येन उत्तरत-

(i) कं विलोक्य बालिका रोदितुमारब्धा ?

(ii) प्रहर्षिता बालिका कां न लेभे ?

III.निर्देशानुसारम् उत्तरत-

(i) 'दीना' इति पदस्य समानार्थकं पदं भवति ?

(ii) 'अहं तुभ्यं तण्डुलमूल्यं दास्यामि' । इति वाक्ये कर्ता क: ?

(iii) मदीया माता अतीव निर्धना वर्तते । इति वाक्ये क्रियापदं किम् ?

(iv) अत्र दृष्ट्वा इति अर्थे किं पदं प्रयुक्तम् ?

IV.अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत ।

## 11. अपठित-अवबोधनम्

शैशवात् एव मीरा कृष्ण भक्तिलीना आसीत्। वैधव्यकालेतस्या: समय: विशेषत: कथाकीर्तनयो: पूजापाठयो: हरिचर्यायां च व्यतीतो भवति स्म। तस्या: एष: कार्यक्रम: तस्य देवराय विक्रमाय न रोचतेस्म।स: तांनानाविधै: क्लेशै: अपीडयत्। एकदास: पुष्पहारेण सह सर्पंप्रेषितवान्। अन्येद्यु: तस्या: जीवनलीलां समापयितुं विष पूरितं चषकं प्रेषयत्। परमेश्वरानुकम्पया सर्पस्तां न अदशत्, अपिचतस्य विषं अमृतमिव अभवत्। ईदृशे: प्रसङ्गेतस्या: विश्वास: कृष्णभक्तौ दृढात्दृढतरोऽभवत्। मीराया: भक्तिभावपूर्णानि गेयपदानि प्रतिप्रान्ते श्रद्धया गीयन्ते । इयं किम्वदन्ती प्रसिद्धा अस्ति यत् मीराद्वारिकायां श्रीकृष्णमूर्तौ विलयंगता।

I. एकपदेन उत्तरत -

(i) सर्प: कान् अदशत् ?

(ii) मीरा कस्मात् कालात् कृष्णभक्तिलीना आसीत् ?

II . एकवाक्येनउत्तरत-

(i) विक्रम: मीरां हन्तुं किं किम् अकरोत् ?

(ii) मीराया: परलोक गमन सम्बन्धे का किम्बदन्ती अस्ति ?

III. भाषिककार्यम्

(i) 'हलाहलं' इत्यस्य पदस्य विपरीतं किं प्रयुक्तम् ?

(ii) ' प्रसिद्धा' इति विशेषण पदं कस्य अस्ति?

(iii) " अन्यस्मिन्दिने" इत्यर्थेक: शब्दप्रयुक्त: ?

(iv) तस्या: एष: कार्यक्रम: - अत्र ‘तस्या: “ इति सर्वनाम पदं कस्यै प्रयुक्तम्?

IV. अनुच्छेदस्य समुचितं शीर्षकं लिखत।

## 12. अपठित-अवबोधनम्

. अधोलिखितम् गद्यांशं पठित्वा तदाधारितानां प्रश्नान् उत्तराणि लिखत –

सर्वे जना: संसारे सुखमिच्छन्ति। सुखं धनेन एव प्राप्तुम शक्यते। अत: धनोपार्जनस्य आवश्यकता भवति। यस्य समीपे धनं भवति स: सुखेन शेते । निर्धनं पुरुषं तु मित्राणि अपि त्यजन्ति। चौर्येण , कपटेन, उत्कोचग्रहणेन च प्राप्तं धनं विनाशकरं भवति । कृषिकर्मणा, व्यापारेण, सेवया, परिश्रमेण च प्राप्तं धनं फलति। मनुष्यो जीवन निर्वाहाय यां कामपि आजीविकां ग्रहीतुं शक्नोति । पठन- पाठनं , कृषि: वाणिज्यं सेवाकर्म समाजसेवादिकं वा । परंतु स: सदा जीवन- साफल्याय सत्कर्म अवश्यं कुर्यात्। निरुद्देश्यं जीवनं विनश्यति। अत: कदाचिदपि उद्देश्यत्यागो न विधेय: । मनुष्यस्य सदुद्योगेन सदुद्देश्यमपि अवश्यं पूर्णं भवति।

अ. एकपदेन उत्तरत – 2x1/2=1

(I) चौर्येण प्राप्तं धनं कीदृशं भवति ?

(ii) मनुष्य: जीवन- साफल्याय किम् अवश्यं कुर्यात्?

ब. पूर्णवाक्येन उत्तरत –

(i) मनुष्यस्य सदुद्देश्यं केन पूर्णं भवति ?

स. निर्देशानुसारं शुद्धम् उत्तरं चित्वा लिखत-

(i)‘पुरुषं’ इति विशेष्यपदस्य विशेषणपदं किम् ?

(अ) धनम् (ब) निर्धनम् (स) मनुष्यम् (द) कर्म

(ii) ’शक्यते ‘ इति क्रियापदस्य कर्तृपदं किम् ?

(अ) सुखम् (ब) प्राप्तुम् (स) धनेन (द) धनम्

(iii) शत्रव: इति पदस्य अत्र किम् विलोमपदम् ?

(अ) श्रेष्ठा: (ब) मित्राणि (स) सत्पुरुषा: (द) सज्जना:

(iv) “धनवान्” इत्यस्य कर्तृपदस्य क्रियापदं किम् ?

(अ) शेते (ब) भवति (स) फलति (द) शक्यते

## रचनात्मक-कार्यम्

### प्रथमम् पत्रम्

1. भावान् गणेश: कटकनगरे पठति । स्वविद्यालयस्य वर्णनं कुर्वता मित्रं दीलेशं प्रति लिखिते पत्रे रिक्त स्थानानि मञ्जूषायां प्रदत्तपदानां सहायतया पूरयत –

छात्रावासत:

(i)________

दिनाङ्क:_________

प्रिय (ii)_________!

अत्र कुशलं तत्रास्तु। मया भवत: पत्रं प्राप्तम्। मम अर्ध्दवार्षिक-परीक्षापरिणाम: अतिशोभन: अस्ति। मया परीक्षायां तु शतम् अङ्का: एव प्राप्ता:। अहं (iii)______पञ्चवादने उत्थाय पठामि। तत: सप्तवादने नित्यकर्माणि कृत्वा (iv)_______ स्मरामि। सायम् उद्याने भ्रमणाय अपि (v)______ | रात्रौ भोजनस्य पश्चात् (vi)_______ दशवादनं यावत् (vii)_______| अहमत्र स्वस्थ: अस्मि। काऽपि (iii)_______ न कार्या। वार्षिक-परीक्षायाम् अपि शोभनै: अङ्कै: उत्तीर्ण: भविष्यामि इति मम (ix)_______ अस्ति।

अनुजाय स्नेहम्

भवत:

अभिन्नमित्रम्

(x)__________

| |
|---|
| गणेश:,जगन्नाथम्, गच्छामि, कटकनगरम् ,दीलेश, चिन्ता, आशा, पठामि , नववादनत: , प्रतिदिनम् |

## द्वितीयं पत्रम्

2. भवान् गोपाल:। मातु: स्वास्थ्यं ज्ञातुं भगिनीं रमां प्रति लिखिते पत्रे मञ्जूषायां दत्तै: पदै: रिक्त स्थानानि पूरयत –

(i)__________

भोपालम्

दिनाङ्क:__________

समादरणीये (ii) _________!

नमो नम:

पत्रेण ज्ञातं यत् पूज्या माता (iii) ________ अस्ति। अत: अहम् अतीव (iv)________ अस्मि किन्तु (v) ________ गृहम् आगन्तुं सक्षम: न अस्मि। भवती (vi) ______ तस्यै (vii)_______ यच्छतु। भगवत्कृपया सा शीघ्रं (viii) _______ भविष्यति। पत्रोत्तरम् (ix) _______ प्रेषयतु।

भवत्या: भ्राता

(x) ________

| |
|---|
| औषधिम् , गोपल: , परीक्षाकारणात् , भगिनि , चिन्तित: , यथासमयम् , ज्वरपीडिता , छात्रावासत: , शीघ्रं , स्वस्था |

## तृतीयं पत्रम्

3. भवान्धनेश: । स्वास्थ्य रक्षणम् उपलक्ष्य भवता मित्रं गौरवं प्रति लिखितं पत्रमिदम् अपूर्णम् अस्ति। मञ्जूषा यां प्रदत्त पदै: पत्रलेखनंपूरयत -

तेजपुरत:

तिथि:--------

प्रियमित्र (i) -------------

सप्रेम (ii)--------- । ज्ञातं यत्त्वंगत सप्ताहात् अस्वस्थ:असि। अहं (iii) --------------- सहतव विषये च चर्चांकृतवान्। (iv)--------पितृमहोदय: प्राकृतिक चिकित्सक: अस्ति। तेन स्वास्थ्य रक्षणाययेे (v) ------ दत्ता: तान् अहं लिखामि। तेनियमा: एवम्सन्ति। प्रात: सूर्योदयात् (vi) ----------- शय्यात्याग: करणीय: । रात्रौचदशवादनेशयितव्यम्। प्रतिदिनं भ्रमणं व्यायाम: चकर्तव्य: । यावत् (vii) ---------- अनुभूति: नभवति , भोजनंन कर्तव्यम्। भोजनेन सहजलंनपातव्यम्। भोजनंशनै: शनै: चर्वणपूर्वकम् (viii) --------- चभक्षणीयम्। प्रतिदिनं पर्याप्तं जलंपातव्यम्। अन्यत्सर्वं कुशलम्। समये समये स्वास्थ्य विषये त्वया अवश्यं सूचनीयम्।

(ix) -------प्रियंमित्रम्

(x) --------------

| |
|---|
| निर्देशा:, क्षुधाया:, त्वदीयम्, मम , प्रसन्नमनसा, धनेश: , स्वपित्रा, गौरव, एकहोरापूर्वम् ,नमस्ते |

## चतुर्थं पत्रम्

4. भवान् मोहन: छात्रावासे वसति । भवान् च स्वदिनचर्या विषये पितरं प्रति पत्रं लिखतु-

देहलीनगरम्

(i)__________

दिनाङ्कः.......

पूजनीय (ii)-------------।

अत्र कुशलं(iii)-------- । मया भवतः पत्रं प्राप्तम् । मम वार्षिक परीक्षा परिणामः अतिशोभनः अस्ति । (iv)---------- तु शतं अङ्काः एव प्राप्ताः । अहं (v)------------ पञ्चवादने उत्थाय पठामि । ततः सप्तवादने नित्यकर्म कृत्वा (vi) ------------स्मरामि । (vii)--------भ्रमणाय अपि गच्छामि । रात्रौ भोजनस्यपश्चात् (viii)------द्वादशपर्यन्तं पठामि । अहं अत्र स्वस्थः अस्मि । कापि चिन्ता न कार्या । वार्षिक परीक्षायां अपि शोभनैः अङ्कैः उत्तीर्णः भविष्यामि । इति (ix)--------------अस्ति । पूजनीयै मात्रे नमः । अनुजाय स्नेहः |

भवदीय: पुत्र:

(x) ------------------

| |
|---|
| मोहन:, आशा, ईश्वरं, नववादनत:, प्रात:काले, पितृपाद !, छात्रावासत:, संस्कृतविषये, तत्रास्तु , सायं |

## पञ्चमं पत्रम्

५ भवान् देवेश:। भवता विद्यालये सर्वोत्तमछात्रस्य पुरस्कार: प्राप्त: स्वज्येष्ठभ्रातरम् अवनीशं सूचयितुं लिखिते पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तपदानां सहायतया पूरयित्वा उत्तरपुस्तिकासु लिखत -

(i)______

दिनाङ्क:__________

पूज्य (ii)_______!

सविनयम् (iii)________ अत्र सर्वं कुशलम् अस्ति। भवतां प्रोत्साहनेन अहं विद्यालये (iv)________ पुरस्कारं प्राप्तवान्। अहं छात्रावासे रुग्णानां (v)_______सेवां करोमि। अनेन अहम् अत्यन्तम् ((vi)_______अनुभवामि। प्रधानाचर्य: एतत् सर्वं ज्ञात्वा (vii)________ प्रसन्न: अभवत्। पितरौ (viii)_______ प्रणमाञ्जलिं निवेदयतु।

(ix)_______ अनुज:

(x)________

| |
|---|
| निवेदयामि , मम ,देवेश: , कटकम् , आनन्दं, अग्रज , भवदीय: , छात्राणाम् , सर्वोत्तमछात्रस्य , अतीव |

## षष्ठं पत्रम्

6. भावान् राघव:। प्लास्टिकस्य प्रयोग: पर्यावरण-नाशक: इति विषयम् अधिकृत्य मित्रम् अङ्कुरं प्रति लिखिते पत्रे रिक्त स्थानानि पूरयित्वा उत्तरपुस्तिकायां लिखत।

(i)________

दिनाङ्क:_________

प्रिय मित्र (ii)_________!

सस्नेहं(iii)_______

अत्र कुशलं तत्रास्तु। ह्य: एव मम विद्यालये ' त्यज प्लास्टिकं रक्ष पर्यावरणम् ' इति विषये एका गोष्ठी अभवत्। अत्रैव मया प्रथमवारं (iv)_______ यत् प्लास्टिकस्य दुरगामिन: घातका: च परिणामा: भवन्ति। अन्यानि सर्वाणि वस्तूनि मृत्तिकायां विनश्य विलीयन्ते परं (v)_______ तु कदापि न अपक्षीयते। न इदं गलति न च विलीयते। एवं हि (vi)_______ कृते महती क्षति: भवति। परं वयं प्रात: जागरणात् आरभ्य रात्रौ निद्रापर्यन्तं प्लस्टिकस्य विविधवस्तूनां प्रयोगं (vii)_______। किमधिकम् इदम् कलमं येन अहं लिखामि , अस्य च मसियष्टि: प्लाष्ट्कनिर्मिता। कल्पयामि यदि एवमेव प्लास्टिकस्य प्रयोग: वर्धिष्यते तर्हि किं भविष्यति ? वस्तुत: पर्यावरणस्य (viii)________ एव अस्माकम् रक्षणम्। आशासे त्वमपि जागरूक: भूत्वा अन्येभ्य: अपि प्रेरणां प्रदास्यसि। गृहे (ix)_______ मम प्रणामा:।

भवत: अभिन्नमित्रम्

(x)_________

| |
|---|
| कुर्म: , ज्ञातम् , प्लास्टिकम् , मातृचरणयो: , नवदिल्लीत: , पर्यावरणस्य , रक्षणे , नम: , राघव: , अङ्कुर |

7. गुवाहाटीनगरे छात्रावासे निवसत: भवत: नाम अभिनेष: अस्ति। पित्रे लिखितं रक्तदानशिविरविषयकं इदं पत्रं मञ्जूषायां दतै: पदै: पूरयित्वा उत्तरपुस्तिकायां लिखत-

छात्रावासत:
गुवाहाटीनगरम्
06/09/2019

पूज्य पितृ महोदय,
चरणवन्दना।
अत्र कुशलं तत्र अपि अस्तु। अद्य अहं (i)....................... निवेदयामि यद् अस्माकं विद्यालये गते सप्ताहे (ii)................. आयोजितम् । अस्माकं कक्षा अध्यापक:(iii)...................... प्रमुख: आयोजक: आसीत् । स: प्रथमं स्वरक्तं प्रायच्छत्। तदनन्तरम्(iv) .................... पञ्च छात्रा: एतस्मिन् शुभकार्ये अग्रेसरा: अभवन् । तेषाम् उत्साहं (v) ....................... मम मनसि अपि भावना संजाता तथा च मयाऽपि स्व रक्तं (vi)................। आशासे यद् (vii).................... मम एतां भावनां (viii)...................... प्रसन्नो भविष्यति। अहं पूर्णतया सकुशलोऽस्मि। (ix) ...................... चिन्तया ।

भवत:(x) .................. पुत्र:
अभिनेष:

| प्रदत्तम् , रक्तदानशिविरम् , दशमकक्षाया:, भवन्तं, आज्ञाकारी, अलं, शिविरस्य, दृष्ट्वा, भवान्, ज्ञात्वा |
|---|

8.भवत: नामरवि:अस्ति। भवान्स्व मित्रम् अरूणंस्वभगिन्या: विवाहे निमन्त्रणं दातुम्इच्छति। मञ्जूषाया: उचितपदै: पत्रंपूरयत –
मञ्जूषा- [भगिन्या:.आगमिष्यति, सुहृद, आगन्तव्यम्शुभ समाचार:, पूर्वत:, त्रिचतुर्दिनानि, तारिकायां ]

शास्त्रीनगरत:
तिथि:------------

(1) ---------- अरुण !
सस्नेहंनमोनम: । अत्रकुशलंतत्रास्तु। इदं (2) ----------- भवन्तंसूचयित्वा आहम् आनन्दम् अनुभवामि यत्मम (3) ------------ विवाह: अस्यमासस्य दशम्यां (4) ------------- रविवासरे निश्चित: जात: । वरयत्रा रामनगरात् (5) ------------- । त्वं मम प्रियं मित्रम् इतिकृत्वा (6) ----------- एवं ज्ञापयामियेनत्वम् अत्र (7) --------- पूर्वम् एव आगच्छ। भवता पितृभ्यां सह अत्र अवश्यमेव (8) --------- । आदरणियाभ्यां स्वपितृभ्यां मम प्रणामा: निवेदनीया: । पत्रं सदालेखितव्यम्।

भवत: प्रियमित्रम्
रवि:

## लघुकथा

1.सनातनः एकः ____ बालकः । एकदा सः ज्वरेण पीडितः विद्यालयं न गच्छति। तस्य माता _______ भवति। सा चिकित्सालयं गत्वा ______ निकटे सर्वं विषयं वदति। चिकित्सकः औषधं ददाति। ततः माता गृहम् आगत्य पुत्राय ____ ददाति। किन्तु पुत्रः औषधं न खादति। माता एकम् उपायं ______। सा एकस्य ______ मध्ये गर्त्तं कृत्वा तत्र औषधं पूरयति। पुत्रः तु ____ चतुरः। सः रसगोलकमध्ये स्थितं तिक्तम् औषधं दूरे _____ रसगोलकं खादति। माता स्नेहेन _____-“औषधं तिक्तमपि शरीरस्य _____ भवति, यथा गुरुजनानाम् उपदेशः कर्कशः अपि हितकरः।

(बोधयति, चिन्तयति, चिकित्सकस्य, औषधं, चपलः, बहुचिन्तिता,रसगोलकस्य, हितकरं, निक्षिप्य, अतीव)

2. पुराकाले देवासुराः एकत्र _____ अकुर्वन्। मन्दराचलः मन्थनदण्डः ,नागराजः ____ रज्जुः आसीत्। देवासुराः नागस्य मुखं ____च आकर्षणं कृतवन्तः। मन्थनकाले ____ निर्गतः। सर्वे जीवाः विषज्वलया ____। न कश्चित् विषप्रकोपं _____ शक्नोति स्म। अतः सर्वे भगवन्तं शङ्करं ______। भगवान् शङ्करः आशुतोषः। अतः सः तत्क्षणात् समुद्रतटे ____ अभवत्। सर्वं विषं स्वयमेव पिबन् _____। सर्वे देवासुराः शङ्करस्य शीतलोपचारम् अकुर्वन्। परं तस्य कण्ठः नीलः सञ्जातः। अतः शङ्करः _____ इति प्रसिद्धः।

(निवारयितुं, वासुकिः, प्रार्थितवन्तः, आक्रान्ताः, अमुर्च्छत्, उपस्थितः, नीलकण्ठ, विषः, समुद्रमन्थनम्, पुच्छं)

3. संस्कृतभाषायां ____ पाणिनीयं व्याकरणमेव ____। पाणिनेः ग्रामस्य नाम ____ यः पाकिस्थाने वर्तते। पाणिनेः ____ नाम उपवर्षाचार्यः। एकदा पाणिनि आश्रमात् बहिः गत्वा प्रयागे अक्षयवटस्य ____शङ्करस्य ध्यानम् अकरोत्। शङ्करः ____ सन् ताण्डवनृत्यावसाने चतुर्दशवारं _____ कृतवान्। ततः चतुर्दशमाहेश्वराणि _____ पाणिनिना लिखितानि। कालान्तरे महामुनिः ____ वैयाकरणिकः अभवत्।

(ढक्कानादं, प्रधानम्, लाहोरः, सम्प्रति, सूत्राणि, गुरोः, महान्, पाणिनि, अधः, प्रीतः)

4. एकस्मिन् विद्यालये बहवः ___ पठन्ति स्म। एकदा शिक्षकः छात्राणां ___ कृतवान्। छात्राः उत्तराणि लिखित्वा दर्शितवन्तः। तेषु गोपालकृष्ण गोखले अपि ____। शिक्षकः उत्तराणां ____ कृत्वा तम् उक्तवान्-"त्वया तु सम्यक् लिखितम्। तुभ्यं ____ दातुम् इच्छामि"। एतत्छ्रुत्वा गोपालः उक्तवान् यत् सः पुरस्कारं प्राप्तुम् ____। यतोहि सः परीक्षायां ____ साहाय्यं नीतवान्। एतादृशेन सत्यवचनेन शिक्षकः ____। सः गोपालम् आलिङ्गनं ___ तस्य सत्यनिष्ठायाः कृते ____ पुरस्कारं दत्तवान्।

(आसीत्, मूल्याङ्कनं, अयोग्यः, परीक्षां, मित्रस्य, पुरस्कारं, छात्राः, तस्मै, कृत्वा, सन्तुष्टः)

5. ___ बोधिसत्त्वः ब्राह्मणकुले जातः, सः अत्यन्तमेधावी। अल्पेन ____ सकलाः विद्याः अधीतवान्। एकदा सः वने ____ पर्वतगुहायां स्थितामेकां व्याघ्रीम् अपश्यत्। सा तत्क्षणमेव _____ प्रसूतवती। अतः व्याघ्री खाद्यसंग्रहार्थमसमर्था सती____व्याकुला अभवत्। ____ बोधिसत्त्वः तस्याः व्याकुलतां ज्ञात्वा चिन्तितवान्-"खाद्यं विना व्याघ्री _____ एव। मम इदम् ____ शरीरं वृथा भविष्यति। अतः मम शरीरेण व्याघ्र्याः जीवनं रक्षिष्यामि।" इति ____ स महात्मा व्याघ्रसमीपं गतः। व्याघ्री अपि तं ____ तृप्ता जाता। एवं भगवान् बुद्धः शतवारं परार्थे प्राणान् त्यक्तवान्।

(अनित्यं, मरिष्यति, शावकान्, दयालुः, क्षुधया, भ्रमन्, पुरा, निश्चित्य, भुक्त्वा, कालेन)

6. वोपदेवः नाम कश्चित् ___ पठनाय पित्रा गुरुगृहं प्रेषितः। स प्रथमतः व्याकरणं पठितुम् ____। पाठे तस्य ____ अवलोक्य गुरुः तम् उक्तवान्-"तव कृते मम महान् ___ विफलः जातः"। खिन्नमानसः वोपदेवः ____ निकषा गत्वा पावच्छे उपविश्य चिन्तापरः अतिष्ठत्। तदा केचन ____ जलं नेतुम् आगताः, ते जलपूर्णघटान् पावच्छान्तर्गतेषु ____ अस्थापयन्। एतत् दृष्ट्वा सः विस्मितः अचिन्तयत्-"सुकठिनः ___ यदि मृत्तिकापात्रेण क्षुण्णः तर्हि स्थूलबुद्धिरहं कथं क्रमशः व्याकरणम् ___ न कुर्य्याम्।" तदारभ्य स व्याकरणं पठित्वा प्रवीण पण्डित रूपेण _____ अलभत।

(पाषाणः, आयत्तं, गर्त्तेषु, आर ब्धवान्, प्रतिष्ठाम्, यत्नः, अमनयोगम्, स्त्रीजनाः, सरोवरं, शिशुः)

7. एकस्मिन् सरोवरे कश्चित् ____ प्रतिवसति स्म। मूषिकः काकः मृगश्चैते त्रयः तस्य ____ आसन्। एकदा स्थलमार्गेण अन्यं जलाशयं प्रति गच्छन् कच्छपं ____ बद्ध्वा स्कन्धे संस्थाप्य गृहं गन्तुं ____। अथ मूषिकादयः उपायम् अनुसृत्य ___ जलाशयस्य समीपे मृतवत् अपतत्। काकश्च तस्योपरि उपविश्य ____ विलिखति स्म। अथ भ्रमणकारणात् ____ व्याधः सरोवरात् जलं पीत्वा ____ पतितं मृगम् अपश्यत्। अतः स जलाशयस्य ____ कच्छपं निधाय मृगसमीपं गतः। अस्मिन् अवसरे _____ आगत्य कच्छपस्य बन्धनम् अच्छिनत्। ततः बन्धनमुक्तः कच्छपः जलाशयं प्रविष्टः।

(उद्यतः, व्याधः, मृगः, अदूरे, सखायः, मूषिकः, कच्छपः, चञ्च्वा, तृषार्त्तः, समीपे)

मञ्जूषात: पदानि चित्वा कथायां रिक्तस्थानानि पूरयत –

| |
|---|
| अगच्छत् ,जालम् , क्षुधार्त: , करोतु, पञ्जरे, व्याध: ,वृक्षे , व्याधस्य, अस्मि , अध: |

8.कश्चन (i) _______ आसीत् । स: अतीव दुष्ट: निष्करुण: च आसीत् । एकदा स: वनम् (ii) ______ । तत्र (iii)______ प्रसारयति स्म । एका कपोती जाले अपतत् । व्याध: कपोतीं (iv)______ स्थापयित्वा अग्रे अगछत् । तदा वृष्टि: अभवत् । भीत: व्याध: आश्रयम् अन्विष्टवान् । एकस्य माहावृक्षस्य (v) _______आगच्छत् । स: वृक्षम् उद्दिश्य - "भो: अत्र य: वसति , तं प्रति शरणागत: (vi) ______ । मां रक्षतु " इति अकथयत् । तत्र (vii) ______ एक: कपोत: आसीत् । कपोत: (viii) ______ स्थितां पत्नीम् अपश्यत् । तादा सा कपोती पतिम् उद्दिश्य अवदत्- " एष: व्याध: शीतार्त: , (ix) _______ अस्माकं गृहम् आगत: अस्ति । एतस्य सत्कारं (x) ______ " इति ।

9. मञ्जूषात: पदानि चित्वा कथायां रिक्तस्थानानि पूरयत –

| |
|---|
| घटम् , तर्हि , अनन्तरम्, गृहं, अश्वान् , ब्राह्मण: , भविष्यति, समीपं , वचनम्, तदा , |

कस्मिंश्चित् नगरे कश्चन दरिद्र: (i) _______ वसतिस्म । स: भिक्षाटनेन जीवनयापनं करोति स्म । कदाचित् स: पिष्टेन पूर्णम् एकं (ii) _______ प्राप्तवान् । स: तं घटम् नागदन्ते स्थापितवान् । तस्य अध: उपविश्य घटमेव पश्यति स्म । एकदा रात्रौ स: चिन्तितवान् " यदि देशे दुर्भिक्ष: भविष्यति (iii)_______ एतस्य शतरूप्यकाणि मूल्यं भविष्यति । तदा अहम् एतस्य विक्रयणं कृत्वा तेन धनेन अजद्वयं क्रयं करिष्यामि । कालान्तरे तेन अजसमूह: भविषति । (iv)_______ अजसमूहस्य विक्रयणं कृत्वा महिषी: , ता: विक्रीय अश्वान् च क्रेष्यामि ।(v) ______ अपि विक्रीय यथेष्टं धनं सम्पादयिष्यामि । बृहत् (vi) _______ निर्मापयिष्यामि ।(vii) ______ कश्चित् ब्राह्मण: आगत्य रूपवतीं स्वकन्यां मह्यं दास्यति । अनन्तरं मम पुत्र: भविष्यति । देवशर्मा इति तस्य नामकरणं करिष्यामि । यदा स: जानुभ्यां चलितुं (viii) _______ भविष्यति तदा अहं पुस्तकं पठिष्यामि । यदा देवशर्मा मम (ix) ______ आगमिष्यति । तदा बालं नेतुं स्वपत्नीं आज्ञापयिष्यामि । यदि सा मम (x)______ श्रोष्यति, तर्हि अहं कोपेन पादप्रहारं करिष्यामि ।" इति चिन्तामग्न: पादप्रहारं कृतवान् एव । प्रहारेण घट: पतित: भग्न: च ।

10. मञ्जूषात: पदानि चित्वा कथायां रिक्तस्थानानि पूरयत –

| |
|---|
| चत्वार: , वृद्ध: , पुत्रान् , अहम् , बहुधान्यं, सुखेन , आलस्यम्, क्षेत्रस्य, अलसा: |

एक: ______ आसीत् । तस्य चत्वार: _______ आसन् । ते अतीव _______ आसन् । अलसान् पुत्रान् दृष्ट्वा वृद्ध: एकम् उपायं चिन्तितवान् । स: _______ आहूय उक्तवान् क्षेत्रे धनम् अस्ति । कुत्र अस्ति इति _______ विस्मृतवान् । भवन्त: अन्विष्य स्वीकुर्वन्तु । ______ जीवन्तु । पुत्रा: सन्तोषेन ______ खननं कृतवन्त: । ते कुत्रापि ______ न लब्धवन्त: । तत्र ते धान्यवपनं कृतवन्त: । _____ प्राप्तवन्त: । पितु: आशयम् ते ज्ञातवन्त: । अनन्तरं ______ परित्यज्य सुखेन कालं यापितवन्त: ।

11. मञ्जूषत :समुचितपदानि चित्वा कथां पूरयत –

| |
|---|
| मनोरथै , :पिपासित , :उपायम्  ,स्वल्पम् ,पाषाणस्य  ,उपरि ,सन्तुष्ट , :पातुम्  ,इतस्तत , : कुत्रापि |

एकदा एक :काक) :i ________(आसीत् । स :जलं पातुम् )ii _______ (अभ्रमत् । परं (iii ______ (जलं न प्राप्नोत् । अन्ते स :एकं घटम् अपश्यत् । घटे )iv _____ (जलम् आसीत् । अत :स :जलं )v ________(असमर्थ :अभवत् । स : एकम् )vi ______ (अचिन्तयत् । स)  :vii ______ (खण्डानि घटे अक्षिपत् । एवं क्रमेण घटस्य जलम् )viii ______ ( आगच्छत् । काक :जलं पीत्वा )ix _______ (अभवत् । परिश्रमेण एव कार्याणि सिध्यन्ति न तु )x______ ( |

# अनुच्छेदलेखनम्

**१.पुस्तकालय:--**

बहूनां पुस्तकानाम् आलय: यत्र भवति स: पुस्तकालय: ।
पुस्तकालये पुस्तकानां महत्त्वं शिक्षाक्षेत्रे विशेषरूपेण वर्तते।
पुस्तकानि न केवलं ज्ञानं यच्छन्ति अपितु मनोरञ्जनं कुर्वन्ति।
जना: तत्र नानासमाचारपत्राणि, पुस्तकानि च पठितुं समर्था: भवन्ति।
अधुना शिक्षासंस्थासु ,कार्यालयेषु अपि पुस्तकालया: भवन्ति।

**२. अनुशासनम् –**

नियमसमुदायस्य पालनम् अनुशासनम् इति कथ्यते।
जीवने अनुशासनपालनस्य महत्त्वं वर्तते।
बाल्यकालात् एव छात्रा: विद्यालये एतत् शिक्षन्ते।
अनुशासनं पालयित्वा छात्रा: उन्नतिं लभन्ते।
अनुशासनहीना: जना: जीवने अधोगतिं लभन्ते।

**३.विद्याया: महत्त्वम् –**

जीवने विद्याया: महत्त्वं सर्वदा सर्वत्र च परिलक्ष्यते।

विद्या सर्वधनेषु श्रेष्ठं धनं वर्तते।
विद्याधनं सञ्चयात् क्षयं याति , उपयोगात् च वर्धते।
विद्या विनयं योग्यतां, धनं, सुखं च ददाति।
अत: सर्वे विद्याधनस्य अर्जनं कुर्यु: ।

**४.सदाचार: -**

साधूनाम् आचरणं सदाचार: कथ्यते।
जीवने सदाचारस्य अनुपालनं महत्त्वपूर्णं भवति।
सदाचारी प्रात: काले उत्थाय पितरौ प्रणमेत्।
सदाचारस्य पालनेन सर्वे शिष्टा: भवन्ति।
सदाचारेण जना: सर्वेषां प्रिया: भवन्ति।

**५. परोपकार: -**

परेषाम् उपकार: परोपकार: कथ्यते।
साधव: सर्वेभ्य: परोपकारं कुर्वन्ति।

वृक्षा: परोपकाराय फलं, पुष्पं, पत्रं च धारयन्ति।
पर्वतात् नदी परोपकाराय सागरं प्रति गच्छति।
सर्वे परोपकाराय प्रयत्नं कुर्यु: ।

**६.प्रदूषणम्–**

प्रदूषणम्  अनावश्यक वस्तूनां निर्गमनेन प्रभवति।
एतत् अधुना जले, स्थले, आकाशे सर्वत्र दृश्यते।
प्लास्टिक वस्तूनां बहुलव्यवहारेण प्रदूषणं भवति।
उद्योगेभ्य:, यानेभ्य: च विषाक्त: धूम: निर्गच्छति।
जना: प्रदूषणं दूरीकर्तुं सावधाना: भवेयु: ।

**७. वृक्षा:-**

वृक्षा: अस्माकं मित्राणि भवन्ति।
वृक्षा: सत्पुरुषा: इव परोपकारं कुर्वन्ति।
वृक्षाणां पुष्पाणि, फलानि, काष्ठं च परोपकाराय भवन्ति।
पथिका: तेषां छायायां विश्रामं कुर्वन्ति।
प्रदूषणस्य निराकरणाय वृक्षाणां महत्त्वं विद्यते।

**८. प्रातर्भ्रमणम्-**

प्रातर्भ्रमणं सर्वेभ्य: स्वास्थ्यप्रदं भवति।
प्रात:काले शुद्धंवातावरणं भवति।
सर्वत्र प्राकृतिकदृश्यम् अतीव शान्तं मनोरमं च भवति।
अस्मिन् समये बाला: युवका:, वृद्धा: अपि भ्रमन्ति।
प्रात: भ्रमणेन जना: स्वस्था:, रोगमुक्ता: च भवन्ति।

**९. विद्यालय: -**

विद्यालय: ज्ञानलाभाय शिक्षणाय च भवति।
अत्र दूरात् अपि बालका: बालिका: च पठनाय आगच्छन्ति।
शिक्षका: स्नेहेन छात्रान् पाठयन्ति।
छात्रा: पठित्वा स्वचरित्रस्य निर्माणं कुर्वन्ति।
विद्यालयस्य परिसर: आनन्दप्रद: भवति।

**१०. विदेशगमनम्-**

जीवने विदेशगमनं भवेत् ।
विदेशगमनेन ज्ञानं वर्धते ।
अन्यान् जनान् वयं ज्ञातुं परयाम: ।
ते अस्मान् ज्ञातुम् पारयन्ति ।
एतेन आनन्द: मिलति ।

# अनुवादकार्यम्

**लट्लकारः**

१.ये लडका व्याकरण पढता है। - एषः बालकः व्याकरणं पठति।

२.दो लडके घर में खेल रहे हैं। - बालकौ गृहे क्रीडतः।

३.लडके बगीचे में घुम रहे हैं। - बालकाः उद्याने भ्रमन्ति।

४.सोहन का भाई जोर से हँस रहा है।- सोहनस्य भ्राता उच्चैः हसति।

५.तुम सभा में भाषण दे रहे हो । - त्वं सभायां भाषणं ददासि।

६.तुम दोनों प्रतियोगिता में गाना गा रहे हो । - युवां प्रतियोगितायां गीतं गायथः।

७.तुम सब भगवान को पूजा कर रहे हो । - यूयं भगवन्तं पूजयथ।

८.मैं उसे जानता हूँ । - अहं तं जानामि।

९.हम दोनों पत्र लिख रहे हैं । - आवां पत्रं लिखावः।

१०.हम सब सुबह उठकर व्यायाम करते हैं । - वयं प्रातः उत्थाय व्यायामं कुर्मः।

**लृट्लकारः**

१.मोहनः निश्चित रूप से विद्यालय नहीं आएगा । -मोहनः निश्चितरुपेण विद्यालयं न आगमिष्यति।

२.वे दोनों अवश्य परीक्षा में उत्तीर्ण होंगे । - तौ अवश्यं परीक्षायां उत्तीर्णं भविष्यतः।

३.कल लडके प्रतियोगिता में चित्र बनाएँगे । - श्वः बालकाः प्रतियोगितायाम् चित्रं रचयिष्यन्ति।

४.दीपक कल ओडिशा से दिल्ली जायेगा । - दीपकः श्वः ओडिशातः दिल्लीं गमिष्यति।

५.तुम मेरी मदद करोगे । - त्वं मम सहायतां करिष्यसि।

६.तुम दोनों परसों मन्दिर जाओगे। - युवां परश्वः मन्दिरं गमिष्यथः।

७.तुम सब दुकान से कम्प्युटर खरिदोगे । - यूयं आपणतः सङ्गणकयन्त्रं क्रेष्यथ।

८.मैं इस साल किताब लिखूँगा । - अहं ऐषमः(अस्मिन् वर्षे ) पुस्तकं लेखिष्यामि।

९.हम दोनों आप सब को उपन्यास पढाएँगे । - आवां भवन्तं उपन्यासं पाठयिष्यावः।

१०.हमलोग सबकी सहायता करेंगे ।- वयं सर्वेषां सहायतां करिष्यामः।

**लङ्लकारः**

१.दिनेश कल आमेरिका गया था । - दिनेशः ह्यः अमेरिकाम् अगच्छत्।

२.क्या आप उसकी प्रतीक्षा कर रहे थे ? – किं भवान् तस्याः प्रतीक्षाम् अकरोत् वा?

३.दो घोडे तेजी से दौड रहे थे। - दौ अश्वौ त्वरया अधावताम्।

४.बच्चे आम खाये थे। - शिशवः आम्रम् अखादन्।

५.तुम बाजार गये थे। - त्वं विपणीम् अगच्छः।

६.तुम दोनों झुठ बोल थे। - युवां मिथ्या अवदतम्।

७.तुम सब सिनेमा देखने गये थे। - यूयं चलच्चित्रं द्रष्टुम् अगच्छत।

८.मैंने पत्र लिखा था। - अहं पत्रम् अलिखम्।

९.हम दोनों रामायण पढ रहे थे। - आवां रामायणम् अपठाव।

१०.हमलोग फुटबाल खेल रहे थे। - वयं पादकन्दुकम् अक्रीडाम।

**विधिलिङ्लकारः**

१.आपको वहाँ जाना चाहिए। - भवान् तत्र गच्छेत्।

२.गोपाल को सबेरे व्यायाम करना चाहिए। - गोपालः प्रातःकाले व्यायामं कुर्यात्।

३.उन दोनों को चावल खाना चाहिए। - तौ अन्नं खादेताम्।

४.लडकों को माँ-बाप का आदेश का पालन करना चाहिए। - बालकाः पितृभ्याम् आदेशं पालनं कुर्युः।

५.तुम्हें परिश्रम करना चाहिए। - त्वं परिश्रमं कुर्याः।

६.तुमदोनों वैज्ञानिक बन सकते हो। - युवां वैज्ञानिकं भवेतम्।

७.तुमसब को विद्यालय जाना चाहिए। - यूयं विद्यालयं गच्छेत।

८.मुझे गीता पढनी चाहिए। - अहं गीतां पठेयम्।

९.हमदोनों को समय पर काम करना चाहिए। - आवां समयानुसारं कार्यं कुर्याव।

१०.हमें सच बोलना चाहिए। - वयं सत्यं वदेम।

**लोट् लकारः**

१.वह अखबार पढे। - सः संवादपत्रं पठतु।

२.वे दोनों मन्च के उपर नाचें। - तौ मन्चस्य उपरि नृत्यताम्।

३.वे सब नौकरी प्राप्त करें। - ते नियुक्तिं प्राप्नुवन्तु।

४.आप हमें पढाइए। - भवान् अस्मान् पाठयतु।

५.तुम क्रिकेट खेलो। - त्वं क्रिकेटं क्रीड।

६.तुमदोनों पानी लाओ। - युवां जलम् आनयतम्।

७.तुमसब कक्षा में बैठो। - यूयं कक्षायाम् उपविशत।

८.मैं अभिनेता बनुँ। - अहम् अभिनेता भवानि।

९.हमदोनों चुटकुले सुनकर हँसें। - आवां हास्यकथां श्रुत्वा हसाव।

१०.हमसब उपकरणों का आविष्कार करें। - वयम् उपकरणानाम् आविष्कारं करवाम।

## उपपदविभक्तेः प्रयोगः

१.पूर्व काल में अयोध्या में दशरथ नामके एक राजा थे। - पुरा अयोध्यायां दशरथः इति एकः नृपः आसीत्।

२.तुम ही मेरे शरण हो। - त्वमेव शरणं मम।

३.राम और सीता के साथ लक्षण भी वनवास गया था। - रामेण सीतया च साकं लक्षणोऽपि वनम् अगच्छत्।

४.माँ बरतन में चावल पका रही है। - माता स्थाल्याम् ओदनं पचति।

५. पिताजी आज मुझे दूरसंचार देंगे। - पिता अद्य मह्यं दूरवाणीं दास्यति।

६. मेरी दो बहने हैं। - मम द्वौ भगिन्यौ स्तः।

७.मेरे घर में चार पंखे हैं। - मम गृहे चत्वारि व्यजनानि सन्ति।

८.तुम भी झुठ बोल रही हो। - त्वमपि मिथ्या वदसि।

९.हे राम! मेरी रक्षा करो। - हे राम! मां रक्षां कुरु।

१०.सत्य की ही विजय होती है। - सत्यमेव जयते।

११.विष्णु वैकुण्ठ में रहते हैं। - विष्णुः वैकुण्ठम् अधिवसति।

१२.बच्चा विस्तर में सोया है। - शिशुः शय्याम् अधिशेते।

१३.ब्राह्मण मन्दिर में रहता है। - ब्राह्मणः मन्दिरम् अधितिष्ठति।

१४.साधु सत्मार्ग में मन देता है। - साधुः सन्मार्गम् अभिनिविशते।

१५.दरिद्र व्यक्ति कुटीर में रहता है। - दरिद्रः कुटीरम् उपवशति।

१६.साँप नेवले को डराता है। - सर्पः नकुलम् अभिद्रुह्यति।

१७.ब्राह्मण प्रतिदिन शिव को नमस्कार करता है। - ब्राह्मणः प्रतिदिनं शिवं नमस्करोति।

१८.वह तुमको कौआ मानता है। - सः त्वां काकं मन्यते।

१९.घोडा जोर से दौड रहा है। - अश्वः त्वरया धावति।

२०.मैं एक महीने से साहित्य पढ रहा हुँ। - अहं मासं साहित्यं पठामि।

२१.तुम यहाँ से विश्वविद्यालय तक जाओ। - त्वम् इतः विश्वविद्यालयं यावत् गछ।

२२.जगन्नाथ और बलभद्र के बीच में सुभद्रा विराजमान होती है। -
जगन्नाथं बलभद्रं च अन्तरा सुभद्रा विराजते।

२३.मैंने पाँच रुपये में कलम खरीदा। - अहं पञ्चभिः मुद्राभिः कलमम् अक्रीणम्।

२४.वह पिता के साथ मन्दिर जा रहा है। - सः पित्रा साकं मन्दिरं गछति।

२५.शिक्षक इसी मार्ग से विद्यालय जा रहे हैं। - शिक्षकः अनेन मार्गेण विद्यालयं गच्छति।

२६.विवाद मत करो। - विवादेन अलम्।

२७.राम गोपाल से एक साल बडा है। - रामः गोपालात् वर्षेण अवरः।

२८.दरिद्र घर में दुःख में रहता है। - दरिद्रः गृहे दुःखेन तिष्ठति।

२९.बाघ वन में अपनी मर्जी से घूम रहा है। - व्याघ्रः वने स्वेच्छया भ्रमति।

३०.पृथ्वी आकृति से गोलाकार है। - पृथिवी आकृत्या वर्त्तुलाकारा।

३१.दुध प्रकृति से मधुर है। - दुग्धं प्रकृत्या मधुरम्।

३२.मेरा पुस्तक से प्रयोजन है। - मम पुस्तकेन प्रयोजनम् अस्ति।

३३.मां बेटे को चाँद दिखाती है। - माता शिशवे चन्द्रं दर्शयति।

३४.मैं पढने के लिए पुस्तकालय जा रहा हू । - अहं पठनाय पुस्तकालयं गच्छामि।

३५.गणेश जी को नमस्कार है। - श्रीगणेशाय नमः।

३६.इन्द्र को फूल समर्पण करते हैं। - इन्द्राय पुष्पाणि वषट्।

३७.रमा फूल पसंद करती है। - रमा पुष्पाय स्पृहयति।

३८.बन्दर को फल अच्छा लगता है। - वानराय फल रोचते।

३९.दाता दरिद्र को धन दे रहा है। - दाता दरिद्राय धनं ददाति।

४०.मन्त्री राजा को संवाद बताता है। - सचिवः नृपाय संवादं ज्ञापयति

४१.दिनेश श्याम से सौ रुपये उधार लिया है। - दिनेशः श्यामात् शतं रुप्यकाणि धारयति।

४२.भक्ति ज्ञान बन जाता है। - भक्तिः ज्ञानाय कल्पते।

४३.बच्चे शिक्षक को निवेदन कर रहे थे। - शिशवः शिक्षकाय निवेदयन्ति स्म।

४४.असाधु लोगो से कौन नहीं डरता। - असज्जनात् कस्य भयं न जायते।

४५.खेत में किसान धान खाने से गाय को वारण करता है।– क्षेत्रे कृषकः धान्येभ्यो गां वारयति।

४६.चोर पुलिस से छुप रहा है।– चौरः आरक्षिणः निलीयते।

४७.कामना से क्रोध जन्म लेता है।– कामात् क्रोधोऽभिजायते।

४८.गोबर से कीडे जन्म लेते हैं।– गोमयात् वृश्चिकाः जायन्ते।

४९.हिमालय से गङ्गा निकलती है। - हिमालयात् गङ्गा प्रभवति।

५०.गङ्गा और यमुना के बीच में प्रयाग है। - गङ्गां यमुनां च अन्तरा प्रयागः वर्त्तते।

## पठित-अवबोधनम्

## || प्रथमः पाठः ||

## {{ अनुशासनम् }}

सन्धिविच्छेदाः-

*वेदमनूच्याचार्योऽन्तेवासिनम् = वेदम्+अनूच्य+आचार्यः+अन्तेवासिनम्
*सत्यं वद = सत्यम्+वद
*धर्मं चर = धर्मं + चर
*कुशलान्न= कुशलात् + न
*मातृदेवो भव = मातृदेवः + भव
*वेदोपनिषद् = वेदः +उपनिषद्
*युक्ता आयुक्ताः = युक्ताः + आयुक्ताः
*चैतदुपास्यम् = च + एतत् +उपास्यम्

समासविग्रहाः

*अनुशासनम् = शासनस्य पश्चात्
*अन्तेवासिनम् = अन्ते वसति इति (तम् )
*प्रजातन्तुम् = प्रजायाः तन्तुम्
*सुचरितानि = सुष्ठु चरितम् इति (तानि)
*ब्राह्मणाः = ब्रह्म जानाति इति (ते)
*अलुक्षा = न लुक्षा

*धर्मकामा = धर्मस्य कामाः

*वेदोपनिषद् = वेदस्य उपनिषद्

प्रत्ययाः

*अनूच्य = अनु + वच् + ल्यप्

*आहृत्य = आ + हृ +ल्यप्

*प्रमदितव्यम् = प्र + मद् + तव्यत्

*उपास्यम् = उप + आस् + यत्

*अनुशासनम् = अनु +शास् + ल्युट्

समानार्थक-शब्दाः

*अनूच्य – सम्बोध्य

*संविदा – सद्भावना

*ह्रिया- लज्जया

*अलूक्षा- अरूक्षा

*उपास्यम् – अनुपालनीयम्

विपरीतार्थक-शब्दाः

*सत्यम्- असत्यम्

*धर्मम्- अधर्मम्

*श्रद्धया- अश्रद्धया

*अवद्यानि- अनवद्यानि

*लुक्षा- अलुक्षा

अव्यय पदानि

*मा *न * अथ * वा *तत्र *यथा * एवम् * च

## एकपदेन उत्तरत

1*कम् मा व्यवच्छेत्सी ?

2*अनवद्यानि कानि ?

3*यदि ते का स्यात् ?

4*अनुशासनम् – इति पाठस्य सन्दर्भग्रन्थः कः?

5*सत्यम् वद-इति कः कम् कथयति ?

**वाक्यांशानाम् मेलनम्**

| क | ख |
|---|---|
| वेदमनूच्याचार्यः | अन्तेवासिनमनुशास्ति |
| आचार्याय प्रियं धनमाहृत्य | प्रजातन्तुंमा व्यवछेत्सी |
| यान्यनवद्यानि कर्माणि | तानि सेवितव्यानि |
| यदि ते कर्मविचिकित्सा वा | वृतविचिकित्सा वा स्यात् |

**प्रसङ्गानुसारं सार्थकम्अर्थम्चित्वा लिखत।**

- भूत्यैःनप्रमदितव्यम्।

  अ) ऐश्वर्याय आ) धनाय इ) सुखाय

- येतत्रब्राह्मणाःसम्मर्शिनः।

  अ) प्रयन्तरताः आ) विचारवन्तः इ) सन्तः

- यदि ये कर्मविचिकित्सा वा।

  अ) अशङ्का आ) विश्वासः इ) कर्मशङ्का

- यानि अनवद्यानि कर्माणि

अ) निन्दनीयानि आ) अनिन्द्यानि इ) कार्याणि

**गद्यांशं पठित्वा उत्तरत :-**

**वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्याय-प्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि, तानि सेवितव्यानि, नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि, नो इतराणि। अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्। ये तत्र ब्राह्मणाः सम्मर्शिनः, युक्ता आयुक्ताः, अलूक्षा धर्मकामाः स्युः, यथा ते तत्र वर्तेरन् तथा तत्र वर्तेथाः। एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्। एवं चैतदुपास्यम्।**

एकपदेन उत्तरत

अ) कम् अनूच्य आचार्यः अन्तेवासिनमनुशास्ति ?

आ) कम् मा व्यवच्छेत्सी ?

पूर्ण वाक्येन उत्तरत।

अ) ब्रह्मणाः कीदृशाः स्युः ?

आ) कस्यै न प्रमदितव्यम् ?

यथानिर्देशम् उत्तरत ।

अ)ब्रह्मणाः सम्मर्शिनः-अत्र विशेष्यपदं किम् ?

आ)मातृदेवोभव-अत्रक्रियापदम् किम् ?

इ)कुचरितानि- पदस्य विलोम पदम् किम्?

ई) न- इत्यर्थे किम् पदम् प्रयुक्तम् ?

## ॥द्वितीयः पाठः॥

## {{ न त्वं शोचितुमर्हसि }}

श्लोकः-1

**ततो मुहूर्ताभ्युदिते जगच्चक्षुषि भास्करे।**
**भार्गवस्याश्रमपदं स ददर्श नृणां वरः ॥1॥**

अन्वयः-

ततः नृणां वरः जगत् चक्षुषि भास्करे मुहुर्ताभ्युदिते सः भार्गवस्य आश्रमपदं ददर्श ।

श्लोकः-2

**सुप्तविश्वस्तहरिणं स्वस्थस्थितविहङ्गमम्।**
**विश्रान्त इव यद्दृष्ट्वा कृतार्थ इव चाऽभवत् ॥2॥**

अन्वयः-

यत् सुप्तविश्वस्तहरिणम् स्वस्थस्थितविहङ्गमं दृष्ट्वा(सिद्धार्थः)विश्रान्तः इव कृतार्थः इव च अभवत् ।
श्लोकः-3

स विस्मयनिवृत्त्यर्थं तपः पूजार्थमेव च।
स्वां चानुवर्तितां रक्षन्नश्वपृष्ठादवातरत् ॥3॥

अन्वयः-
सः विस्मयनिवृत्यर्थम् पूजर्थम् एव च तपः च स्वाम् अनुवर्तिताम् रक्षन् अश्वपृष्ठात् अवातरत् ।
श्लोकः-4

अवतीर्य च पस्पर्श निस्तीर्णमिति वाजिनम्।
छन्दकं चाब्रवीत्प्रीतः स्नापयन्निव चक्षुषा ॥4॥

अन्वयः-
च अवतीर्य निस्तीर्णम् इति वाजिनम् पस्पर्श,चक्षुषा स्नापयन् इव च प्रीतः छन्दकम् अब्रवीत् ।
श्लोकः-5

इमं ताक्ष्योंपमजवं तुरङ्गमनुगच्छता।
दर्शिता सौम्य मद्भक्तिर्विक्रमश्चायमात्मनः ॥5॥

अन्वयः –
सौम्य ! अयम् आत्मनः इमम् ताक्ष्योंपमजवं तुरङ्गम् अनुगच्छता मत् भक्तिः विक्रमः च दर्शिता ।
श्लोकः-6

को जनस्य फलस्थस्य न स्यादभिमुखो जनः।
जनीभवति भूयिष्ठं स्वजनोऽपि विपर्यये ॥6॥

अन्वयः-
स्वजनः अपि विपर्जये भूयिष्ठम् जनीभवति फलस्थस्य जनस्य अभिमुखः कः जनः न स्यात् ।
श्लोकः-7

इत्युक्त्वा स महाबाहुरनुशंसचिकीर्षया।
भूषणान्यवमुच्यास्मै संतप्तमनसे ददौ ॥7॥

अन्वयः-
इति उक्त्वा सः महाबाहुः अनुशंसचिकीर्षया संतप्तमनसे अस्मै भूषणानि अवमुच्य ददौ।
श्लोकः-8

मुकुटाद्दीपकर्माणं मणिमादाय भास्वरम्।
ब्रुवन्वाक्यमिदं तस्थौ सादित्य इव मन्दरः ॥8॥

अन्वयः-
मुकुटात् दीपकर्माणम् भास्वरम् मणिम् आदाय इदम् वाक्यम् ब्रुवन् सादित्य इव मन्दरः तस्थौः।
श्लोकः-9

अनेन मणिना छन्द प्रणम्य हृशो नृपः।
विज्ञाप्योऽमुक्तविश्रम्भं संतापविनिवृत्तये ॥9॥

अन्वयः- छन्द सन्तापविनिवृत्तये अनेन मणिना हृशः नृपः अमुक्त विश्रम्भम् विज्ञाप्य (तस्थौ) ।
श्लोकः-10

जरामरणनाशार्थं प्रविष्टोऽस्मि तपोवनम्।
न खलु स्वर्गतर्षेण नास्नेहेन न मन्युना ॥10॥

अन्वयः-
(अहम्)जरा मरण नाशार्थं,तपोवनं प्रविष्ठः अस्मि । न खलु स्वर्गतर्षेण न अस्नेहेन न मन्युना ।
श्लोकः-11

तदेवमभिनिष्क्रान्तं न मां शोचितुमर्हसि।
भूत्वापि हि चिरं श्लेषः कालेन न भविष्यति ॥11॥

अन्वयः-
तत् एवम् अभिनिष्क्रान्तम् माम् (त्वम्)शोचितुम् न अर्हसि श्लेषः भूत्वा अपि हि चिरम् कालेन(श्लेषः)न भविष्यति।
श्लोकः-12

ध्रुवो यस्माच्च विश्लेषस्तस्मान्मोक्षाय मे मतिः।
विप्रयोगः कथं न स्याद्भूयोऽपि स्वजनादिति ॥12॥

अन्वयः-
यः यस्मात् विश्लेषः ध्रुवः भूयः अपि तस्मात् स्वजनात् विप्रयोगः मोक्षाय कथम् न स्यात् इति मे मतिः (अस्ति)।
श्लोकः-13

यदपि स्यादसमये यातो वनमसाविति।
अकालो नास्ति धर्मस्य जीविते चञ्चले सति ॥13॥

अन्वयः-
यत् अपि असौ असमये वनम् जातः स्यात् इति चञ्चले जीविते सति धर्मस्य अकालः न अस्ति।
श्लोकः-14

एवमादि त्वया सौम्य विज्ञाप्यो वसुधाधिपः।
प्रयतेथास्तथा चैव यथा मां न स्मरेदपि ॥14॥

अन्वयः-
सौम्य ! त्वया वसुधाधिपः आदि एवम् विज्ञाप्यः तथा च एव प्रयतेथाः यथा अपि (सः)माम् न स्मरेत्
श्लोकः-15

अपि नैर्गुण्यमस्माकं वाच्यं नरपतौ त्वया।
नैर्गुण्यात्त्यज्यते स्नेहः स्नेहत्यागान्न शोच्यते ॥15॥

अन्वयः-

अपि त्वया अस्माकम् नरपतौ नैर्गुण्यात् स्नेहः त्यज्यते स्नेहत्यागात् नशोच्यते ।
सन्धियुक्तपदानि—

| | |
|---|---|
| * नैर्गुण्यात् +त्यज्यते= | नैर्गुण्यात्त्यज्यते |
| * स्नेहत्यागात् न = | स्नेहत्यागान्न |
| * एवम्+आदि= | एवमादि |
| * च+ एव = | चैव |
| * स्मरेत्+ अपि = | स्मरेदपि |
| * अकालः+ न +अस्ति= | अकालो नास्ति। |
| * स्यात् +असमये= | स्यादसमये |
| * यत् +अपि= | यदपि |
| * कथम् +न= | कथं न |
| * स्वजनात् +इति = | स्वजनादिति |
| * भूयः +अपि= | भूयोऽपि |
| * चिरम् +श्लेषः = | चिरं श्लेषः |
| * तत् +एवम्+ अभिनिष्क्रान्तम्= | तदेवमभिनिष्क्रान्तम् |
| * भूत्वा +अपि= | भूत्वापि |
| * विज्ञाप्य+ अमुक्तविश्रम्भम्= | विज्ञाप्यऽमुक्तविश्रम्भम् |
| * हृशः + नृपः= | हृशो नृपः |
| * भूषणानि +अवमुच्य= | भूषणान्यवमुच्य |
| * कः +जनस्य = | को जनस्य |
| * स्वजनः +अपि= | स्वजनोऽपि |
| * ताक्ष्र्य +उपमम्= | ताक्ष्र्योपम् |
| * स्नापयन् +इव= | स्नापयन्निव |
| * निः+तीर्णम् +इति= | निस्तीर्णमिति |
| * च+अब्रवीत् = | चाब्रवीत् |
| * यत् +दृष्ट्वा= | यद्दृष्ट्वा |
| * विश्रान्तः +इव = | विश्रान्त इव |
| * जगत् +चक्षुषि = | जगच्चक्षुषि |
| * सः + ददर्श = | स ददर्श |
| * कृतार्थः+ इव = | कृतार्थ इव |
| * च +अभवत्= | चाऽभवत् |
| * ताक्ष्र्योपम = | ताक्ष्र्य+ उपम |
| * इत्युक्त्वा= | इति+उक्त्वा |
| * प्रविष्टोऽस्मि= | प्रविष्टः+अस्मि |
| * तपोवनम्= | तपः+वनम् |

* प्रयतेथास्तथा= प्रयतेथाः+ तथा

* वनमसाविति= वनमसौ+ इति

* स्याद्भूयोऽपि= स्यात्+भूयः+अपि

* स +आदित्यः+इव = सादित्य इव

समासविग्रहपदानि-

*आश्रमपदम्= आश्रमस्य पदम्

*जगच्चक्षुषि= जगतः चक्षुषि

*सुप्तविश्वस्तहरिणम्= सुप्तम् विश्वस्तम् हरिणम्

*स्वस्थस्थितविहङ्गमं = स्वस्थस्थितम् विहङ्गमम्

*पूजार्थम्= पूजायाः अर्थम्

*विस्मयनिवृत्यर्थम् = विस्मयस्य निवृत्यर्थम

*तार्क्ष्योपम = तार्क्ष्यस्य उपम

*अनुगच्छता= पश्चात् गच्छता

*भक्तिर्विक्रमश्च= भक्तिः च विक्रमः च तयोः समाहारः

*जनीभवति = अजनः जनः भवति

*फलस्थस्य = फले स्थितः इति तस्य

*महाबाहुः= महान्तौ बाह्वौ यस्य सः

*संतप्तमनसे= संतप्तः मनः यस्य सः(तस्मै)

*सादित्यः= आदित्येन सहितः

*अमुक्तविश्रम्भम् = न मुक्त अमुक्त विश्रम्भ तम्

*सन्तापविनिवृत्तये =- सन्तापस्य विनिवृत्तये

*जरामरणनाशार्थं= जरा च मरणम् च तयोः नाशार्थम्

*तपोवनम्= तपसः वनम्

*स्वर्गतर्षेण = स्वर्गाय तर्षः (तेन)

*अस्नेहेन= न स्नेहेन

*असमये= न समये

*अकालः= न कालः इति

*वसुधाधिपः= वसुधायाः अधिपः

*नैर्गुण्यम्= गुणस्य अभावः

*नरपतौ= नराणां पतिः(तस्मिन्)

स्नेहत्यागात्= स्नेहस्य त्यागात्

वाक्यांशानाम् मेलनम्

| *क* | *ख* |
|---|---|
| जरामरणनाशार्थम् | प्रविष्टोऽस्मि तपोवनम् |
| भूषणान्यवमुच्यास्मै | संतप्तमनसे ददौ |
| तदेवमभिनिष्क्रान्तम् | मा शोचितुम् अर्हसि |
| मुकुटद्दीपकर्माणम् | मणिमादाय भास्वरम् |

समानार्थकपदानि।

- तार्क्ष्यः- गरुदः
- मन्युना- क्रोधेन
- मन्दरः- विन्ध्याचलः
- श्लेषः- संयोगः

विपरीतार्थक-पदानि

- सुप्तः- जागृतः
- अवतीर्य- आरुह्य
- स्वजनः -परजनः
- नृपः- रंकः
- ध्रुवः- चञ्चलः

विशेष्य-विशेषणयोः योजनं कुरुत

| क (विशेषण) | ख( विशेष्य) |
|---|---|
| अभिनिष्क्रान्तम् | माम् |
| जगच्चक्षुषि | भास्करे |
| अभिमुखः | जनः |
| भास्वरम् | मणिम् |
| जीविते | चञ्चले |

श्लोकं पठित्वा उत्तरत ।

**अपि नैर्गुण्यमस्माकं वाच्यं नरपतौ त्वया।**
**नैर्गुण्यात्त्यज्यते स्नेहः स्नेहत्यागान्न शोच्यते ॥15॥**

एकपदेन उत्तर।

अ)त्वया नरपतौ किं वाच्यम् ?
आ)त्वया केषां नैर्गुण्यं वाच्यम् ?

पूर्ण वाक्येन उत्तरत।

अ)नैर्गुण्यात् कः त्यजते ?
आ)स्नेहवशात् किं न क्रियते ?

यथा निर्देशम् उत्तरत ।

अ)गुणस्य अभावः-इत्यर्थे किम् पदं प्रयुक्तम् ?
आ)वाच्यम् -क्रियापदस्य कर्तृपदम् किम् ?
इ)अवाच्यम् - पदस्य विलोम पदम् किम्?
ई) राजनि- इत्यर्थे किम् पदम् प्रयुक्तम् ?

## ॥ तृतीयः पाठः॥
## {{ मातुराज्ञा गरीयसी }}

समानार्थकाः शब्दाः-

- गरीयसी- श्रेष्ठा
- परिवादम्- निन्दाम्
- वृतान्तः- समाचारः
- वक्तव्यम्- कथयितव्यम्
- रुष्टेन- क्रुद्धेन
- मृदुः- कोमलम्
- वार्यताम्- निवार्यताम्
- स्थैर्यम्- स्थिरता
- ननु - निश्चयः
- प्रतीकारः- समाधानः
- अरिः- शत्रुः
- उदर्केण- परिणामयुक्तेन
- शक्रसम- इन्द्रसम
- श्लाघा- आत्मस्तुतिः
- *स्पृहा- इच्छा ,कामना
- परिवादम्- निन्दाम्
- आकर्ण्य- श्रुत्वा
- आयास- उद्यमः
- रोषम्- क्रोधम्
- प्रासादः- भवनम्
- आर्जवम्- सारल्यम्

सन्धिपदानि-

- रक्षितव्येति= रक्षितव्या +इति
- उत्पन्नोऽयम्= उत्पन्नः +अयम्
- स्वजनस्तदा= स्वजनः +तदा
- गुणेनात्र= गुणेन+अत्र
- स्वजनादिति= स्वजनात् +इति
- येनाकार्यम्= येन +अकार्यम्
- तस्या एव= तस्याः+एव
- स एव= सः एव
- पुत्रार्थे= पुत्र+अर्थे
- अत्राप्यलोभः= अत्र +अपि+अलोभः
- भवदभिषेकः= भवत् +अभिषेकः
- लोभोऽत्र= लोभः+अत्र
- भ्रातरो मे= भ्रातरः +मे
- परं न = परम्+ न
- ततस्तदानीम्= ततः+ तदानीम्
- नृपतिर्गतः= नृपतिः+ गतः
- हस्तेनैव= हस्तेन + एव
- मोहं च= मोहम्+च
- यतश्छलिता= यतः+छलिता

- धनुर्गृहीतम्= धनुः +गृहीतम्
- खल्वस्यायास= खलु+अस्य+आयास
- शोच्यासने= शोच्य+आसने
- निर्मनस्विता= निः+ मनस्विता
- तेऽस्ति= ते +अस्ति
- धनुर्न= धनुः+ न
- वयं वा= वयम्+ वा
- नियतीव= नियति +इव
- नोत्सहे= न+उत्सहे
- मनोरथः = मनः+रथः
- अतो तु = अतः+तु
- खल्वनुगच्छामि= खलु+ अनुगच्छामि
- खल्वहम्= खलु+अहम्
- नैवाप्तम् = न+एव+आप्तम्
- मङ्गलार्थेऽनया= मङ्गल+अर्थे +अनया
- रक्षितव्येति= रक्षितव्या+इति
- येनाकार्यम्= येन+ अकार्यम्
- किमप्यभिमतम्= किमपि+ अभिमतम्

समासपदानि---

- महाराज= महान् राजा
- धैर्यसागरः= धैर्यस्य सागरः
- कृतनिश्चयः= कृतः निश्चयः येन सः
- शोच्यासने= शोच्ये आसने
- निर्मनस्विता= मनोस्वितायाः अभावः
- सुमित्रामातः= सुमित्रा माता यस्य सः
- अक्षोभः= न क्षोभः
- नृपतिः= नृणां पतिः
- त्रैलोक्यम्= त्रयाणां लोकानां समाहारः
- शक्रसमः= शक्रेण समं
- अकार्यम्= न कार्यम्
- स्वजनः= स्वस्य जनः
- भवदभिषेकः= भवतः अभिषेकः
- बालभावः= बालस्य भावः
- अनाहूता= न आहूता
- राज्यभ्रंशः= राज्यस्य भ्रंशः
- धनुश्श्लाघा= धनुषः श्लाघा
- अप्रभुत्वम्= न प्रभुत्वम्

प्रत्ययापदानि

- परित्रातव्यः= परि+त्रा+ तव्यत्
- रक्षितव्या= रक्ष्+तव्यत्
- पुत्रवती= पुत्र+मतुप्+ङीप्
- विसर्जितः= वि+सृज्+क्त
- क्षोभितः= क्षुभ्+क्त
- वक्तव्यम्= वच्+तव्यत्

- भवितव्यम्= भू+तव्यत्
- श्रोतुम् = श्रु+तुमुन्
- गतः= गम्+क्त
- धारयितुम्= धारय्+तुमुन्

वाक्यांशानाम् मेलनम्

| क | ख |
|---|---|
| * भरतो वा भवेत् राजा | वयं वा ननु तत् समम् |
| * इदानीमपि सन्देहः | किं क्षमा निर्मनस्विता |
| * दोषेषु बाह्यमनुजम् | भरतं हनानि |
| * किं रोषणाय रुचिरम् | त्रिषु पातकेषु |

प्रसङ्गानुसारं सार्थकम् अर्थम् लिखत।

- नोत्साहे श्लाघनीये काले वारयितुम्...।

अ)गर्हणीये आ)प्रशंसनीये* इ) निन्दनीये

- आः अपण्डितः खलु भवान् ।

अ)विद्वान् आ)चतुर इ) मूर्खः

- रोदितव्ये काले सौमित्रिणा धनुर्गृहीतम् ।

अ)लक्षणेन आ) रामेण इ)भरतेन

- परित्रायताम् परित्रायताम् कुमार !

अ)अक्ष्यताम् आ) गम्यताम् इ) आगम्यताम्

नाट्यांशम् पठित्वा उत्तरत।

- काञ्चुकीयः—परित्रायताम् परित्रायताम् -……………
- रामः- …………. येनाकार्यं करिष्यति।(प्रथमः अनुच्छेदः)

**काञ्चुकीयः - परित्रायतां परित्रायतां कुमारः।**

**रामः - आर्य! कः परित्रातव्यः।**

**काञ्चुकीयः - महाराज!**

**रामः - महाराजः इति। आर्य! ननु वक्तव्यम्। एकशरीर-संक्षिप्ता पृथिवी रक्षितव्येति। अथ कुत उत्पन्नोऽयं दोषः?**

**काञ्चुकीयः - स्वजनात्।**

**रामः - स्वजनादिति। हन्त! नास्ति प्रतीकारः।**

**शरीरेऽरिः प्रहरति हृदये स्वजनस्तथा।**
**कस्य स्वजनशब्दो मे लज्जामुत्पादयिष्यति॥1॥**

**काञ्चुकीयः - तत्र भवत्याः कैकय्याः।**

एकपदेन उत्तरत

अ)एकशरीर-संक्षिप्ता का रक्षितव्या ?

आ)शरीरे कः प्रहरति ?

पूर्ण वाक्येन उत्तरत।

अ)स्वजनशब्दः मे काम् उत्पादयिष्यति ?

आ)केन गुणेन अत्र भवितव्यम् ?

यथानिर्देशम् उत्तरत ।

अ)कः परित्रातव्यः-अत्र विशेषणपदं किम् ?

आ)निवारणम्-पदस्य पर्यायपदम् किम् ?
इ)गुणः- पदस्य विलोम पदम् किम्?
ई) निश्चितरुपेण- इत्यर्थे किम् पदम् प्रयुक्तम् ?

## ॥चतुर्थः पाठः॥

## {{प्रजानुरञ्जको नृपः}}

श्लोक-१

त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ॥1॥

अन्वयः -संभृतार्थानाम् त्यागाय मितभाषिणाम् सत्याय विजिगीषूणाम् यशसे गृहमेधिनाम् प्रजायै ।

श्लोक-२

शशवऽभ्यस्तावद्याना यावन ावषयाषणाम्।
वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥2॥

अन्वयः –शैशवेऽभ्यस्तविद्यानाम् यौवने, विषयैषिणाम् वार्धक्ये, मुनिवृत्तीनाम् अन्ते योगेन तनुत्यजाम् ।

श्लोक-३

रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥3॥

अन्वयः -तद्गुणैः कर्णम् आगत्य चापलाय प्रचोदितः अपि सन् रघूणाम् अन्वयम् वक्ष्ये ।

श्लोक-४

वैवस्वतो मनुर्नाम माननीयो मनीषिणाम्।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ॥4॥

अन्वयः -मनीषिणाम् माननीयः महीक्षितानाम् आद्यः छन्दसाम् प्रणवः इव वैवस्वतः मनुः नाम (राजा) आसीत् ।

श्लोक-५

तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः।
दिलीप इव राजेन्दुरिन्दुः क्षीरनिधाविव ॥5॥

अन्वयः - शुद्धिमत्तरः बुद्धिमती तत् अन्वये क्षीरनिधौ इवुः इव राजेन्दुः इव दिल्लीपः प्रसूतः ।

श्लोक-६

आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः।
आगमैः सदृशारम्भ आरम्भसदृशोदयः ॥6॥

अन्वयः -आकारसदृशप्रज्ञः प्रज्ञयासदृशागमः आगमैः सदृशः आरम्भः आरम्भसदृश उदयः ॥

श्लोक-७

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥7॥

अन्वयः -सः प्रजानाम् एव भूत्यर्थम् ताभ्यः बलिम् अग्रहीत् हि रविः सहस्रगुणम् उत्स्रष्टुम् रसम् आदत्ते ।

श्लोक-८

ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥8॥

अन्वयः –ज्ञाने मौनं शक्तौ क्षमा त्यागे श्लाघाविपर्ययः गुणः अनुबन्धित्वात् तस्य सप्रसवा इव गुणाः(सन्ति)।

श्लोक-९

प्रजानां विनयाधानाद्रक्षणाद्भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः ॥9॥

अन्वयः- सः प्रजानाम् विनयाधानात् रक्षणात् भरणात् अपि पिता( इव ),तासाम् पितरः केवलम् जन्महेतवः (आसन्) ।

श्लोक-१०

द्वेष्योऽपि संमतः शिष्टस्तस्यार्तस्य यथौषधम्।
त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता ॥10॥

अन्वयः – द्वेष्यः अपि संमतःशिष्टः तस्य आर्तस्य औषधन् यथा दुष्टः प्रियः अपि उरगक्षता अङ्गुलिः इव त्याज्यः आसीत्।

श्लोक-११

स वेलावप्रवलयां परिखीकृतसागराम्।
अनन्यशासनामुर्वीं शशासैकपुरीमिव ॥11॥

अन्वयः – सः वेलावप्रवलयाम् परिखीकृतसागराम् अनन्यशासनाम् उर्वीम् एकम् पुरीम् इव शशास।

समानार्थकशब्दाः

- मितभाषिणाम्= स्वल्पभाषिणाम्
- अन्वयम्= वंशम्
- प्रचोदितः= प्रेरितः
- प्रणवः= ओङ्कारः
- छन्दसाम्= वेदानाम्
- प्रसूतः= जातः
- इन्दुः= चन्द्रमा
- क्षीरनिधौ= क्षीरसमुद्रे
- आगमैः= शास्त्रैः
- भूत्यर्थम्= उन्नतये
- बलिम्= करम्

- उत्स्रष्टुम्= दानाय
- आदत्ते= गृह्णाति
- सप्रसवा= सोदरा
- भरणात्= पोषणात्
- शशास= शासनं कृतवान्
- उर्वीम्= पृथिवीम्
- उरगः = सर्पः

<u>विपरीतशब्द</u>

- यौवने= वार्धक्ये
- मौनम्= चपलाम्
- त्याज्यः= ग्राह्यः
- शशास= शासनं न कृतवान्
- क्षता= अक्षता

विशेष्य-विशेषणयोः योजनं कुरुत।

| क (विशेषण) | ख( विशेष्य) |
|---|---|
| मानवीयः | मन्युः |
| राजेन्दुः | दिलीपः |
| जन्महेतवे | पितरः |
| उरगक्षता | अङ्गुली |
| तस्य | आर्तस्य |

सन्धिपदानि

- तन्तुवाग्विभवोऽपि- तन्तुवाग्विभव + अपि
- योगेनान्ते- योगेन +अन्ते
- ताभ्यो बलिम्- ताभ्यः + बलिम्
- शशासैकपुरीमिव- शशासै+ एकपुरीमिव
- संभृतार्थानां- संभृत+अर्थानां
- तद्गुणैः- तत् + गुणैः
- तन्तुवाग्विभवः- तन्तुवाक् + विभवः
- प्रणवश्छन्दसाम्- प्रणवः+छन्दसाम्
- मनुर्नाम- मनुः + नाम
- तदन्वये- तत् + अन्वये
- राजेन्दुरिन्दुः- राज + इन्दुः+इन्दुः
- क्षीरनिधाविव- क्षीरनिधौ + इव
- सदृशागमः- सदृश +आगम
- सदृशारम्भः- सदृश+ आरम्भः
- भूत्यर्थम्- भूति +अर्थम्
- रसं रविः- रसम् +रविः
- सप्रसवा इव- सप्रसवाः +इव
- पितरस्तासाम्- पितरः + तासाम्
- स पिता- सः + पिता
- द्वेषोऽपि- द्वेषः +अपि
- संमतः- सम् +मतः
- यथौषधम्- यथा + औषधम्
- त्याज्यो दुष्टः- त्याज्यः + दुष्टः

समासविग्रहपदानि-

- अभ्यस्तविद्यानाम्= अभ्यस्ता विद्या यैः तेषाम्

- मुनीवृत्तीनाम्= मुनीनां वृत्तिः (तेषाम्)
- तन्तुवाग्विभवः= तन्तुवाक् एव विभवः यस्य सः
- तद्गुणैः= तेषाम्/तैः गुणैः
- मनीषिणाम्= मनसः ईषिणः (तेषाम्)
- महीक्षिताम्= महीम् क्षियन्ति इति (तेषाम्)
- राजेन्दुः= राजसु इन्दुः इति
- आकारसदृशप्रज्ञः= आकारेण सदृशी प्रज्ञा यस्य सः
- भूत्यर्थम्= भूत्यैः अर्थम् इति
- श्लाघाविपर्ययः= श्लाघायाः विपर्ययः
- विनयाधानात्= विनयस्य अधानात्
- जन्महेतवः= जन्मनः एव हेतवः ये ते
- उरगक्षता= उरगेण क्षता इति
- वेलावप्रवलयाम्= वेल एव वप्रलयः यस्याः सा(ताम्)
- अनन्यशासनम्= न अस्ति अन्यस्य शासनम् यस्याम् सा (ताम्)

प्रत्ययपदानि

- आगत्य आ+गम् +ल्यप्
- उत्स्रष्टुम् उत्+सृज्+तुमुन्
- समंत सम्+मन्+क्त
- त्याज्यः त्यज्+यत्
- शिष्टः शास् + क्त
- प्रचोदितः प्र+चुद्+क्त
- शुद्धिमतिः शुद्धि + मतुप्
- प्रसूतः प्र+सू+क्त

वाक्यांशानाम् मेलनम्

| क | ख |
|---|---|
| प्रजानामेव भूत्यर्थम् | स ताभ्यः बलिमग्रहीत् । |
| शैशवेऽभ्यस्त-विद्यानां | यौवने विषयैषिणाम् । |
| स वेलावप्रवलयाम् | परिखीकृतसागराम् । |
| आसीन्महीक्षितामाद्यः | प्रणवच्छन्दसामिव । |

प्रसङ्गानुसारं सार्थकम् अर्थम् चित्वा लिखत ।

- त्यागाय संभृतार्थानाम् सत्याय <u>मितभाषिणाम्</u> ।

अ) बहुजल्पकानाम् आ) अल्पभाषिणा* इ) मिथ्यावादिनाम्

- <u>आगमैः</u> सदृशारम्भ आरम्भसदृशोदयः ।

अ) शास्त्रैः* आ)शस्त्रैः इ) खड्गैः

- प्रजानामेव <u>भूत्यर्थं</u> स ताभ्यो बलिमग्रहीत् ।

अ) विकासाय* आ) विनाशाय इ) निवासाय

श्लोकं पठित्वा उत्तरत ।

त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ॥1॥

एकपदेन उत्तरत ।

अ) केषां धनं त्यागाय भवति ?

आ)विजिगीषूणां जयः कस्मै भवति ?

पूर्णवाक्येन उत्तरत ।

अ)केषां परिणयः प्रजायै अस्ति ?

आ) केषां मितभाषिता सत्याय अस्ति ?

निर्देशानुसारम् उत्तरत ।

अ) धनानाम् - इत्यर्थे किम् पदम् प्रयुक्तम् ?

आ) जनतायै -पदस्य अर्थे किम् पदम् प्रयुक्तम् ?

इ) संग्रहाय - पदस्य विलोम पदम् किम् अत्र प्रयुक्तम् ?

ई) अल्पभाषिणाम् - इत्यर्थे किम् पदम् प्रयुक्तम् ?

## ॥पञ्चमः पाठः॥

## {{दौवारिकस्य निष्ठा}}

सन्धियुक्तपदानि-

- प्रत्यागतम् = प्रति +आगतम्
- सत्यपि = सति +अपि
- कोऽत्र= को +अत्र
- क्षणानन्तरम्= क्षण +अनन्तरम्
- साक्षेपमवोचत् = स +आक्षेपम् अवोचत्
- मुमुर्षुरिति = मुमुर्षुः +इति
- ततो दौवारिकः= ततः +दौवारिकः
- नाज्ञायि = न +अज्ञायि
- पृष्टोऽपि= पृष्टः+अपि
- प्रत्युत्तरम्= प्रति+ उत्तरम्
- संन्यासी= सम्+न्यासी
- ततस्तयोरेवम्= ततः +तयोः+एवम्
- इत्येवम्= इति+एवम्
- अभूदालाप= अभूत्+आलाप
- संन्यासिनोऽपि= संन्यासिनः +अपि
- बहूक्तम्= बहु +उक्तम्
- प्राह्णे= प्र+अह्णे
- स्तियो बालाश्च= स्तियः+बालाः+च
- साक्षेपम्= स+आक्षेपम्
- आहूता वा= आहूताः+वा
- केऽपि = के+अपि
- तदधुनैव= तत् +अधुना+एव
- केचनान्ये= केचन+अन्ये
- इतस्तु= इतः+ तु
- सत्यं कथय= सत्यम्+ कथय
- कस्त्वम्= कः+त्वम्
- कुत आयात= कुतः+ आयात
- कस्यापि= कस्य+अपि
- तदागच्छ= तत्+आगच्छ
- दुर्गाध्यक्षसमीपे दुर्ग+अध्यक्षसमीपे
- यथोचितम्= यथा+उचितम्
- महाशयोऽसि= महाशयः+असि
- दौवारिकस्तु= दौवारिकः+ तु

- पुनरेवम्= पुनः+एवम्
- नयन्येव= नयन्+एव
- प्रत्यभिजानासि= प्रति+अभिजानासि
- तदवधार्यम्= तत्+अवधार्यम्
- परीक्षितोऽसि= परीक्षितः+असि
- नियुक्तोऽसि= नियुक्तः+असि

समासविग्रहपदानि

- प्रतापदुर्गदौवारिकः= प्रतापदुर्गस्य दौवारिकः
- पादक्षेपध्वनिः = पादक्षेपस्य ध्वनिः
- दीपप्रकाशे= दीपस्य प्रकाशे
- अनवलोकयन्= न अवलोकयन्
- अनुत्तरयन्= न उत्तरयन्
- मुमुर्षुः= मर्तुम् इच्छुकः
- मन्दस्वरमेदुरा= मन्दस्वरेण मेदुरा
- काषायवासाः= काषायाणि वासांसि धारयति यः सः
- धृततुम्बीपात्रः= धृतम् तुम्बीपात्रम् येन सः
- भव्यमूर्तिः= भव्या च सा मूर्तिः
- कठोरभाषणैः= कठोरैः भाषणैः
- प्रवेशसमयः= प्रवेशस्य समयः
- साक्षेपम्= आक्षेपेण सहितम्
- प्राप्तपरिचयपत्राः= प्राप्तम् परिचयपत्रम् यैः ते
- विश्वासघातम्= विश्वासस्य घातम्
- स्वामिवञ्चनम्= स्वामिनम् वञ्चनम्
- शिवगणाः= शिवस्य गणा
- देशद्रोहिणः= देशस्य द्रोही तस्य इति
- गूढचरम्= गूढम् चरति इति
- महाशयः= महान् आशयः
- ग्राम्यवराकस्य= ग्रामस्य वराकः तस्य
- यथायोग्य= योग्यम् अनतिक्रम्य
- पुरस्कारभाजनानि= पुरस्कारस्य भाजनानि

प्रत्ययापदानि

- निधाय- नि+धा+ ल्यप्
- प्रत्यागतम्- प्रति+आ+गम्+क्त
- विदधानः- वि+धा+शानच्
- निरीक्षमाणः- निर्+ईक्ष्+शानच्
- भासमाणेन- भास्+शानच्
- अभिज्ञाय- अभि+ज्ञा+ल्यप्
- पश्यन्- दृश्+शतृ
- अनुत्तरयन्- अनु+तृ+शतृ
- पश्यता- दृश्+शतृ

विशेष्यविशेषण मेलनम्

| विशेषणम् | विशेष्यम् |
|---|---|
| गम्भीरेण | स्वरेण |
| मुमुर्षः | जनः |
| कठोरैः | भाषणैः |
| परिष्कृतम् | पारदभस्मः |

- कपटी सन्यासिन्
- उत्कोचलोभी नीचः
- देशद्रोहीणः गुढचरः
- आहूताः अभ्यागताः

वाक्यांशैः सह सार्थक मेलनम्

- कथं विश्वासघातम् स्वामिवञ्चनम् च शिक्षयति
- स एताभिज्ञाय त्वया यथोचितं व्यवहरिष्यति
- कथमस्मान् संन्यासिनोऽपि कठोरभाषणैः तिरष्करोति
- महाराजस्य सन्ध्योपासनसमये भवादृशानां प्रवेशसमयो भवति

प्रसङ्गानुसारं सार्थकम् अर्थम् चित्वा लिखत ।

- ततस्तयोरेवम् <u>अभूदालापः</u> ।

अ) वार्तालापः * आ) कलहः इ)विवादः

- त्वादृशाः एव वस्तुतः पुरस्कार-<u>भाजनानि</u> भवन्ति ।

अ) योग्यानि आ)पात्राणि* इ)कमलानि

- नाज्ञायि भवता <u>प्रभुवर्याणाम्</u> आदेशो यत्...।

अ) जनानाम् आ) ईश्वराणाम् इ) राज्ञाम् *

- महाराजशिववीरस्याज्ञाम् वयं शिरसा <u>वहामः</u> ।

अ) पालयामः * आ) तिरस्कृमः इ)अवमानयाव

संवादं पठित्वा उत्तरत । (उदाहरणार्थम् एकः एव संवादः प्रदीयते )

- संन्यासी---कथमस्मान् संन्यासिनोऽपि-------
- दौवारिकः- संन्यासिन् संन्यासिन्------- न तु रात्रौ ।(द्वितीयः अनुच्छेदः)

एकपदेन उत्तरत

अ)अस्मान् सन्यासिन्ऽपि कैः तिरस्करोति ?

आ) कः अयं क्षान्तः ?

पूर्ण वाक्येन उत्तरत।

अ)किं कथयता दौवारिकेण आक्रुश्यते ?

आ)के किमपि न प्रष्टव्याः ?

यथानिर्देशम् उत्तरत ।

अ)अयम् अपराधः-अत्र विशेषणपदं किम् ?

आ)निशायाम्-पदस्य पर्यायपदम् किम् ?

इ)मूर्खाः- पदस्य विलोम पदम् किम्?

ई) प्रतीक्षामहे-क्रियापदस्य कर्तृपदम् किम् ?

॥ षष्ठः पाठः॥

## {{ सूक्ति- सौरभम् }}

श्लोकः-1

अन्वयः -विधात्रा स्वायत्तम् एकान्तगुणम् अज्ञतायाः छादनम् विनिर्मितम् विशेषतः सर्व- विदाम् समाजे अपण्डितानाम् विभूषणम् मौनम् (अस्ति) ।

**स्वायत्तमेकान्तगुणं विधात्रा**
**विनिर्मितं छादनमज्ञतायाः।**
**विशेषतः सर्वविदां समाजे**
**विभूषणं मौनमपण्डितानाम्॥1॥**

*(भर्तृहरिः)*

सन्धियुक्तपदानि

- सर्विदां समाजे = सर्विदाम् + समाजे

समासविग्रहाः

- सर्वविदाम् सर्वम् वेत्ति इति
- विभूषणम् विशिष्टं भूषणम् इति
- अपण्डितानाम् न पण्डितानाम्

समानार्थकशब्दाः

- स्वायत्तम् स्वतन्त्रम्
- अज्ञतायाः मूर्खतायाः
- छादनम् आवरणम्
- अपण्डितानाम् मूर्खाणाम्
- विभूषणम् शोभा, सौन्दर्यम्
- विधाता ब्रह्मा

विपरीतशब्दाः

- स्वायत्तम् पराधीनम्
- अपण्डितानाम् पण्डितानाम्
- मौनम् प्रगल्भम्

श्लोकः-2

**रूपं प्रसिद्धं न बुधास्तदाहु-**
**र्विद्यावतां वस्तुत एव रूपम्।**
**अपेक्षया रूपवतां हि विद्या**
**मानं लभन्तेऽतितरां जगत्याम् ॥2॥**

*(मङ्गलदेव शास्त्री)*

अन्वयः -बुद्धाः प्रसिद्धम् रुपम् न वस्तुतः विद्यावताम् रुपम् एव तत् न् आहुः । वस्तुतः हि जगत्यम् विद्या रुपवताम् अपेक्षया अतितराम् मानम् लभन्ते ।

सन्धियुक्तपदानि

- रुपं प्रसिद्धम् — रुपम्+ प्रसिद्धम्
- लभन्तेऽतितराम् — लभन्ते+अतितराम्
- बुधास्तदाहुर्विद्यावताम् — बुधाः+तत्+आहुः+विद्यावताम्

समानार्थकशब्दाः

- प्रसिद्धम् — विख्यातम्
- आहुः — कथ्यते
- मानम् — सम्मानम्
- अतितराम् — अत्यधिकम्

विपरीतशब्दाः

- प्रसिद्धम् — अप्रसिद्धम्
- मानम् — अपमानम्
- अतितराम् — न्यूनम्

श्लोकः-3

**न दुर्जनः सज्जनतामुपैति शठः सहस्त्रैरपि शिक्ष्यमाणः।**
**चिरं निमग्नोऽपि सुधा-समुद्रे न मन्दरो मार्दवमभ्युपैति ॥3॥**

*(भट्टरामनाथ शास्त्री)*

अन्वयः -सहस्त्रैः अपि शिक्ष्यमाणः दुर्जनः शठः सज्जनताम् न उपैति , चिरम् सुधा-समुद्रे निमग्नः अपि मन्दरः मार्दवम् न अभ्युपैति ।

सन्धियुक्तपदानि

- सहस्त्रैरपि — सहस्त्रैः+अपि
- निमग्नोऽपि — निमग्नः+अपि
- अभ्युपैति — अभि+उपैति
- सज्जनताम् — सत्+जनताम्

समासविग्रहाः

- सुधा-समुद्रे — सुधायाः समुद्रे

समानार्थकशब्दाः

- चिरम् — सदैव
- मन्दरः — मन्दरः पर्वतः
- आर्दवम् — आद्रताम्
- सुधा-समुद्रे — अमृत सागरे

विपरीतशब्दाः

- दुर्जनः — सज्जनः
- सज्जनताम् — दुर्जनताम्

श्लोकः-4

**कर्णामृतं सूक्तिरसं विमुच्य दोषेषु यत्नः सुमहान् खलानाम्।**
**निरीक्षते केलिवनं प्रविश्य क्रमेलकः कण्टकजालमेव ॥4॥**

*(महाकवि विल्हण)*

अन्वयः – खलानाम् कर्णामृतम् सूक्तिरसम् विमुच्य दोषेषु सुमहान् यत्नः (भवति), क्रमेलकः केलिवनम् प्रविश्य कण्टकजालम् एव निरीक्षते।

सन्धियुक्तपदानि

- कर्णामृतम् — कर्ण+अमृतम्
- केलिवनं प्रविश्य — केलिवनम् + प्रविश्य
- कण्टकम् — कं +टकम्
- सूक्तिरसम् — सु+उक्तिरसम्

समासविग्रहाः

- कर्णामृतम् — कर्णे अमृतम् इति
- केलिवनम् — केल्याः वनम्
- कण्टकजालम् — कण्टकानाम् जालम्

समानार्थकशब्दाः

- खलानाम् — दुष्टानाम्
- यत्नः — प्रयासः
- क्रमेलकः — उष्ट्रः
- प्रविश्य — प्रवेशं कृत्वा

प्रत्ययाः

- प्रविश्य — प्र + विश् + ल्यप्
- विमुच्य — वि +मुच् + ल्यप्

विपरीतशब्दाः

- खलानाम् — सज्जनानाम्
- दोषेषु — गुणेषु
- प्रविश्य — निर्गत्य

श्लोकः-5

**उत्साह-सम्पन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम्।**
**शूरं कृतज्ञं दृढसौहृदञ्च लक्ष्मीः स्वयं याति निवासहेतोः ॥5॥**

अन्वयः – लक्ष्मीः उत्साहसम्पन्नम् अदीर्घसूत्रम् क्रियाविधिज्ञम् व्यसनेषु असक्तम् शूरम् कृतज्ञम् दृढसौहृदम् च निवासहेतोः स्वयम् याति।

सन्धियुक्तपदानि

- व्यसनेष्वसक्तम् — व्यसनेषु+असक्तम्
- स्वयं याति — स्वयम् +याति

समासविग्रहाः

- अदीर्घसूत्रम् — न दीर्घसूत्रम्
- क्रियाविधिज्ञम् — क्रियायाः विधिं जानाति यः सः तम्

- असक्तम् — न सक्तम्
- दृढसौहृदम् — दृढम् च तत् सौहृदम्
- निवासहेतोः — निवासस्य हेतोः

समानार्थकशब्दाः

- व्यसनेषु — आलस्येषु,दुःखेषु

विपरीतशब्दाः

- कृतज्ञम् — कृतघ्नम्
- अदीर्घसूत्रम् — दीर्घसूत्रम्
- असक्तम् — सक्तम्

श्लोकः-6

**दीर्घप्रयासेन कृतं हि वस्तु निमेषमात्रेण भजेद् विनाशम्।**
**कर्तुं कुलालस्य तु वर्षमेकं भेत्तुं हि दण्डस्य मुहूर्तमात्रम् ॥6॥**

*(सूक्तिमुक्तावली)*

अन्वयः – दीर्घप्रयासेन कृतम् वस्तु हि निमेषमात्रेण विनाशम् भजेत् । हि कुलालस्य तु वर्षमेकम् कर्तुम् दण्डस्य मुहूर्तमात्रम् भेत्तुम् (पर्याप्तम् भवति) ।

सन्धियुक्तपदानि

- कृतं हि — कृतम्+ हि
- भजेद् विनाशम् — भजेत्+ विनाशम्
- भेत्तुं हि — भेत्तुम्+हि

समासविग्रहाः

- दीर्घप्रयासेन — दीर्घेण प्रयासेन

समानार्थकशब्दाः

- भेत्तुं — भेदनम् कर्तुम्
- हि — निश्चित रुपेण
- कुलालस्य — कुम्भकारस्य
- भजेत् — गच्छेत्

श्लोकः-7

**आरभेत हि कर्माणि श्रान्तः श्रान्तः पुनः पुनः।**
**कर्माण्यारभमाणं हि पुरुषं श्रीर्निषेवते ॥7॥**

अन्वयः - श्रान्तः श्रान्तः पुनः पुनः हि कर्माणि आरभेत श्रीः कर्माणि आरभमाणम् पुरुषम् हि निषेवते ।

सन्धियुक्तपदानि

- कर्माण्यारभमाणम् — कर्माणि+आरभमाणम्
- पुरुषं श्रीर्निषेवते — पुरुषम्+श्रीः+निषेवते

समासविग्रहाः

- कर्माण्यारभमाणम् — कर्माणाम् आरभमाणम्

समानार्थकशब्दाः

- श्रीः लक्षी
- निषेवते सेवां करोति
- पुनः पुनः वारंवारम्

विपरीतशब्दाः

- पुनः पुनः एकवारम्

श्लोकः-8

एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना।
आह्लादितं कुलं सर्वं यथा चन्द्रेण शर्वरी ॥8॥

अन्वयः – एकेन अपि विद्यायुक्तेन साधुना सुपुत्रेण सर्वम् कुलम् आह्लादितम् (भवति) यथा चन्द्रेण शर्वरी (सुशोभते )।

सन्धियुक्तपदानि -

- एकेनापि एकेन +अपि
- कुलं यथा कुलम्+यथा

समासविग्रहाः

- सुपुत्रेण शोभनः पुत्रः तेन
- विद्यायुक्तेन विद्यया युक्तेन

समानार्थकशब्दाः

- कुलम् वंशम्
- शर्वरी रात्रिः

विपरीतशब्दाः

- विद्यायुक्तेन विद्याहीनेन

श्लोकः-9

गुणी गुणं वेत्ति न वेत्ति निर्गुणः
बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः
करी च सिंहस्य बलं न मूषकः ॥9॥

*(चाणक्यनीतिः)*

अन्वयः – गुणी गुणम् वेत्ति निर्गुणः न वेत्ति , बली बलम् वेत्ति निर्बलः न वेत्तिः । पिकः वसन्तस्य गुणम् (वेत्ति) वायसः न (वेत्ति) करी च सिंहस्य बलम् (वेत्ति) मूषकः न (वेत्ति ) ।

सन्धियुक्तपदानि

- गुणं वेत्ति गुणम् +वेत्ति
- बलं वेत्ति बलम् + वेत्ति

समासविग्रहाः

- निर्गुणः गुणानाम् अभावः इति
- निर्बलः बलस्य अभावः

समानार्थकशब्दाः

- निर्बलः बलहीनः
- निर्गुणः गुणहीनः
- वेत्ति जानाति
- करी गजः
- वायसः काकः

विपरीतशब्दाः

- निर्बलः बलवान्
- निर्गुणः सगुणः

श्लोकः-10

**अजीर्णे भेषजं वारि जीर्णे वारि बलप्रदम्।**
**भोजने चामृतं वारि भोजनान्ते विषापहम् ॥10॥**

*(वैद्यकीय सुभाषित संग्रह)*

अन्वयः – अजीर्णे वारि भेषजम् (भवति),जीर्णे वारि बलप्रदम् (भवति) । भोजने च वारि अमृतम् (भवति) ,भोजनान्ते (च) (वारि) विषापहम् (भवति)।

सन्धियुक्तपदानि

- भोजनान्ते भोजन +अन्ते
- विषापहम् विष+अपहम्
- चामृतम् च+अमृतम्
- भेषजं वारि भेषजम्+ वारि

समासविग्रहाः

- बलप्रदम् बलम् प्रददाति इति
- भोजनान्ते भोजनस्य अन्ते
- विषापहम् विषस्य अपहम्

समानार्थकशब्दाः

- वारि जलम्
- भेषजम् औषधम्

विपरीतशब्दाः

- जीर्णे अजीर्णे
- अमृतम् विषम्

श्लोकः-11

**अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।**
**सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥11॥**

*(हितोपदेश)*

अन्वयः – शास्त्रम् अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम् (अस्ति)। (शास्त्रम् )सर्वस्य लोचनम् , यस्य न अस्ति (शास्त्रम् ) सः अन्धः एव (अस्ति) ।

सन्धियुक्तपदानि

- संशयोच्छेदि — संशय +उच्छेदि
- नास्त्यन्धः — न +अस्ति+अन्धः
- परोक्षार्थस्य — परोक्ष +अर्थस्य

समासविग्रहाः

- संशयोच्छेदि — अनेक संशयानाम् उच्छेदि
- परोक्षार्थस्य — परोक्षस्य अर्थस्य

समानार्थकशब्दाः

- लोचनम् — नेत्रम्

विपरीतशब्दाः

- अन्धः — चक्षुष्मान्

प्रत्ययविभाजनम्----

- कृतम्- — कृ+ क्त
- प्रविश्य — प्र + +विश्+ल्यप्
- विमुच्य — वि+मुच्+ल्यप्
- भेतुम् — भिद्+तुमुन्
- कर्तुम् — कृ+तुमुन्

विशेष्यविशेषण मेलनम्---

- एकेन — सुपुत्रेण
- अल्पज्ञः — पुरुषः
- सर्वम् — कुलम्
- एकम् — लोकम्
- सुमहान् — यत्नः

श्लोकः-12

**अल्पज्ञ एव पुरुषः प्रलपत्यजस्त्रं**
**पाण्डित्यसम्भृतमतिस्तु मितप्रभाषी।**
**कांस्यं यथा हि कुरुतेऽतितरां निनादं**
**तद्वत् सुवर्णमिह नैव करोति नादम् ॥12॥**

अन्वयः- अल्पज्ञः पुरुषः एव अजस्रम् प्रलपति ,पाण्डित्यसम्भृतमतिः तु मितप्रभाषी (भवति) । यथा कांस्यम् अतितराम् निनादम् हि कुरुते तद्वत् इह सुवर्णम् नादम् न एव करोति ।

सन्धियुक्तपदानि

- अल्पज्ञ एव — अल्पज्ञः + एव
- कांस्यं +यथा — कांस्यम् + यथा
- नैव — न + एव

समासविग्रहाः

- अल्पज्ञ — अल्पं जानाति इति

- मितप्रभाषी — मितम् प्रभाषते इति

समानार्थकशब्दाः

- अजस्रम् — निरन्तरम्
- निनादम् — शब्दम्
- अतितराम् — अत्यधिकम्

विपरीतशब्दाः

- अल्पज्ञः — पण्डितः
- प्रलपति — प्रलापं करोति

विशेष्यविशेषण मेलनम्---

- एकेन — सुपुत्रेण
- अल्पज्ञः — पुरुषः
- सर्वम् — लोकम्
- एकम् — कुलम्
- सुमहान् — यत्नः

वाक्यांशानाम् मेलनम् ।

| क | ख |
|---|---|
| अपेक्षया रूपवतां हि विद्या | मानं लभन्तेऽतितरां जगत्याम् । |
| अल्पज्ञः पुरुषः एव अजस्रम् प्रलपति | पाण्डित्यसम्भृतमतिः तु मितप्रभाषी । |
| विशेषतः सर्वविदां समाजे | विभूषणं मौनपण्डितानाम् । |
| स्वायत्तमेकान्तगुणं विधात्रा | विनिर्मितम् छादनमज्ञतायाः । |

सार्थकम् अर्थम् चित्वा लिखत

- सर्वस्य <u>लोचनम्</u> शास्त्रम् ।

अ) नेत्रम्* आ) मुखम् इ) कर्णम्

- न <u>मन्दरो</u> मार्दवमभ्युपैति ।

अ) मन्दारपुष्पम् आ) सागरः इ) मन्दरपर्वतः

- <u>गुणी</u> गुणं वेत्ति

अ) गुणवान् आ) धनवान् इ) विद्यावान्

- वस्तु <u>निमेषमात्रेण</u> विनाशं भवेत् ।

अ) अकस्मात् आ) क्षणमात्रेण इ) केवलम्

श्लोकम् पठित्वा उत्तरत ।

**अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।**
**सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥11॥**

*(हितोपदेश)*

एकपदेन उत्तरत

अ)शास्त्रं यस्य नास्ति सः कीदृशः ?

आ) शास्त्रम् कस्य लोचनम् अस्ति ?

पूर्ण वाक्येन उत्तरत।

अ) शास्त्रम् कस्य उच्छेदनम् करोति ?

आ) कस्य दर्शकम् शास्त्रम् ?

यथानिर्देशम् उत्तरत ।

अ)सर्वस्य लोचनम् -अत्र विशेषणपदं किम् ?

आ) नेत्रम् - पदस्य पर्यायपदम् किम् ?

इ)प्रत्यक्षार्थस्य - पदस्य विलोम पदम् किम्?

ई) नास्ति -क्रियापदस्य कर्तृपदम् किम्  ?

## ॥ सप्तमः पाठः॥

## {{ नैकेनापि समं गता वसुमती }}

सन्धियुक्तपदानि

| | |
|---|---|
| • चिरं प्रजा | चिरम् +प्रजा |
| • भोज इति | भोजः +इति |
| • ह्यात्मनः | हि +आत्मनः |
| • यद्यहम् | यदि +अहम् |
| • लोकापवादः | लोक + अपवादः |
| • सहोदरम् | सह+उदरम् |
| • राज्यं पुत्राय | राज्यम्+पुत्राय |
| • कश्चनः | कः +चनः |
| • तत्पदेऽन्यम् | तत्+पदे+अन्यम् |
| • यथेच्छम् | यथा+इच्छम् |
| • ततो मुञ्जः | ततः +मुञ्जः |
| • प्राह | प्र+आह |
| • शयनम् | शे +अनम् |
| • तदाहम् | तदा+अहम् |
| • जीवन्नपि | जीवन्+अपि |
| • अभुक्त एव | अभुक्त: +एव |
| • यद्यपि | यदि +अपि |
| • देवादेश | देव+आदेशः |
| • पुनरपि | पुनः+अपि |
| • सापराधोऽस्मि | स+अपराधः+अस्मि |
| • कदापि | कदा+अपि |
| • भवतीति | भवति+इति |
| • कुपितो राजा | कुपितः +राजा |
| • सेवकोऽसि | सेवकः +असि |
| • राजाज्ञा | राजा +आज्ञा |
| • पालनीयैवेति | पालनीया +एव +इति |
| • यदादिष्टम् | यत् +आदिष्टम् |
| • वापि | वा +अपि |
| • प्रावोचत् | प्र+अवोचत् |
| • एवास्ति | एव +अस्ति |

- रक्षेति		रक्ष +इति
- योगीन्द्र		योगी +इन्द्र
- भोजश्चापि		भोजः+च +अपि
- तपस्तेपे		तपः +तेपे
- एतन्निशम्य		एतत् + निशम्य
- सेतुर्येन		सेतुः+येन
- नैकेनापि		न+एकेन +अपि

समासविग्रहाः

- महाबलम्		महत् बलम्
- लोकापवादः		लोके अपवादः
- राज्यलोभात्		राज्यस्य लोभात्
- पुत्रहानिः		पुत्रस्य हानिः
- व्यापारमुद्रया		व्यापाराय मुद्रा इति ,तया
- वंशोच्छेदः		वंशस्य उच्छेदः
- तत्पदे		तस्य पदे
- यथेच्छम्		इच्छाम् अनतिक्रम्य
- शास्त्रपाङ्गत		शास्त्रेषु पारङ्गत
- सगौडः		गौडैः सहितः
- अभुक्तः		न भुक्तः इति
- देवादेशः		देवस्य आदेशः
- सापराधम्		अपराधेन सहितम्
- पुत्रवधः		पुत्रस्य वधः
- राजाज्ञा		राज्ञः आज्ञा इति
- अनिच्छन्		न इच्छन् इति
- वधयोजनाम्		वधस्य योजनाम्
- तद्वचनैः		तस्य वचनम् इति तैः
- गृहाभ्यन्तरे		गृहस्य अभ्यन्तरे
- राजभवनम्		राज्ञः भवनम् इति
- महीपतिः		महीम् पाति इति
- वसुमती		वसु अस्याः अस्ति इति
- शोकसन्तप्तः		शोकेन शोकात् वा सन्तप्तः
- महापापिनः		महान् पापी इति तस्य
- प्राणदानेन		प्राणस्य दानम् इति तेन
- शिवप्रसादेन		शिवस्य प्रसादेन
- श्मशानभूमौ		श्मशानाय भूमिः इति तस्याम्
- गजेन्द्रारुढः		गजेन्द्रे आरुढः
- तपोवनभूमिः		तपोवनस्य भूमिः ताम्
- दशास्यान्तकः		दशास्यस्य अन्तकः
- खड्गप्रहारसमये		खड्गस्य प्रहारस्य समयः
- राजलक्ष्मी		राज्ञः लक्ष्मी

प्रत्ययाः

| | |
|---|---|
| • दूरीकृत्य | दूरी +कृ +ल्यप् |
| • विधाय | वि+धा+ल्यप् |
| • सम्प्रेष्य | सम् +प्र +इष् ल्यप् |
| • समागम्य | सम् +आ+गम् +ल्यप् |
| • जीवन् | जीव्+शतृ |
| • मृतः | मृ+क्त |
| • चिन्तयित्वा | चिन्त्+क्त्वा |
| • हन्तव्यम् | हन् + तव्यत् |
| • आनेतव्यम् | आ+ नी+तव्यत् |
| • निशम्य | नि +शम् +ल्यप् |
| • नत्वा | नी+क्त्वा |
| • आकर्ण्य | आ+कर्ण् +ल्यप् |
| • निक्षिप्य | नि + क्षिप् +ल्यप् |
| • मत्वा | मन् +क्त्वा |
| • ज्ञात्वा | ज्ञा +क्त्वा |
| • नीतवान् | नी+क्तवतु |
| • आपन्नः | आ +पद् +क्त |
| • हतवान् | हन् + क्तवतु |
| • आदिष्ट | आ+दिश् +क्त |
| • आलोक्य | आ +लोक्+ ल्यप् |
| • संवीक्ष्य | सम्+ वि+ ईक्ष् +ल्यप् |
| • अपहाय | अप + हा +ल्यप् |
| • दत्तम् | दा+ क्त |
| • विचार्य | वि +चर्+ल्यप् |

विशेष्यविशेषणपदानाम् मेलनम्

| विशेषणम् | विशेष्यम् |
|---|---|
| • बालम् | पुत्रम् |
| • दत्तम् | राज्यम् |
| • दिवंगते | राजनि |
| • शास्त्रपारंगतः | ब्राह्मणः |
| • इमाम् | भविष्यवाणीम् |
| • सन्तप्तः | मुञ्जः |
| • बङ्गदेशाधीश्वरम् | वत्सराजम् |

वाक्यांशानाम् मेलनम्

| क | ख |
|---|---|
| • नैकेनापि समं गता वसुमती | नूनं त्वया यास्यसि । |
| • तस्य वार्धक्ये भोज | इति पुत्रः समजनि । |
| • भोजश्चापि चिरम् | प्रजाः पालितवान् । |
| • आत्मनो वधयोजनां ज्ञात्वा | भोजः किमपि वत्सराजम् कथितवान् । |

रेखाङ्कितानाम् सार्थकम् अर्थं चित्वा लिखत ।

- नैकेनापि समं गता वसुमती ।

अ) पृथ्वी * आ) जलम् इ)आकाशः

- कश्चन कापालिकः सभां समागतः ।

अ) सज्जनः आ) दुर्जनः इ) संन्यासी*

- शिव-प्रसादेन सः जीवितःभविष्यति ।

अ)आशीषैः आ)कृपया* इ) भवनेन

- सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः ।

अ)रावणः आ)श्रीरामः * इ) श्रीकृष्णः

***अनुच्छेदम् पठित्वा प्रश्नानाम् उत्तराणि लिखत ।(प्रथमः अनुच्छेदः)

पुरा धाराराज्ये………………………………….तत्किमपि यथेच्छम् पृच्छ ।

एकपदेन उत्तरत

अ) पुरा धाराराज्ये किम् नाम राजा आसीत् ?

आ) तस्य वार्धक्ये कः समजनि ?

पूर्ण वाक्येन उत्तरत।

अ)राजा आत्मनः जरां ज्ञात्वा किं विचरयामास ?

आ)संप्राप्तराज्य-संपत्तिः मुञ्जः किम् कृतवान् ?

यथानिर्देशम् उत्तरत ।

अ) मुञ्जं महावलम् -अत्र विशेषणपदं किम् ?

आ)अवगत्य-पदस्य पर्यायपदम् किम् ?

इ)यौवने - पदस्य विलोमपदम् किम्?

ई) पर्यपालयत् -क्रियापदस्य कर्तृपदम् किम् ?

## || अष्टमः पाठः ||

## {{ हल्दीघाटी }}

श्लोकः—1

स्वाधीनताऽऽर्यभुवि मूर्तिमती समाना
राणाप्रताप-बलवीर्यविभासमाना।
आटीकते समुपमा नहि यां सुशोचिः
शाटीव सा जयति काचन हल्दिघाटी ॥1॥

अन्वयः – आर्यभुवि स्वाधीनता मूर्तिमती समाना राणाप्रताप-बलवीर्य विभासमाना ,याम् समुपमाम् सुशोचिः नहि आटीकते , सा काचन हल्दीघाटी शाटी इव जयति ।

सन्धियुक्तपदानि

- शाटीव= शाटी + इव
- स्वाधीनताऽऽर्यभुवि= स्वाधीनता + आर्यभुवि

समासविग्रहाः

- आर्यभुवि = आर्याणाम् भूः इति तस्याम्
- शाटीव= शाट्याः इव
- बलवीर्यविभासमाना= बलेन वीर्येण च विभासमाना
- समुपमाम् = समानी उपमा यस्याः सा ताम्

समानार्थकशब्दाः

- आर्यभुवि = भारत भूमिः
- सुशोचिः= दैदीप्यमानः

विपरीतशब्दाः

- स्वाधीनता = पराधीनता

प्रत्ययाः

- विभासमाना वि + भास् + शानच्
- मूर्तिमती मूर्ति + मतुप् + ङीप्
- स्वाधीनता स्वाधीन + तल्

श्लोकः-2

प्राची यदा हसति हे प्रिय! मन्दमन्दं
वायुर्यदा वहति नन्दनजं मरन्दम्।
या प्रत्यहं किल तदा मतिमाननीयां
शोभां दधात्युषसि काञ्चनकाञ्चनीयाम् ॥2॥

अन्वयः -हे प्रिय ! यदा प्राची मन्दमन्दम् हसति यदा नन्दनजम् मरन्दम् वायुः वहति तदा उषसि या हल्दीघाटी किल प्रत्यहम् मतिमाननीयाम् काञ्चनकाञ्चनीयाम् शोभाम् दधाति ।

सन्धियुक्तपदानि

- वायुर्यदा = वायुः + यदा
- प्रत्यहम् = प्रति + अहम्
- दधात्युषसि= दधाति +उषसि

समासविग्रहाः

- नन्दनजम्= नन्दने जायते इति
- प्रत्यहम्= अहनि अहनि इति
- काञ्चनकाञ्चनीयाम्= काञ्चनम् इव काञ्चनीयाम्

समानार्थकशब्दाः

- प्राची पूर्व दिशा
- उषसि प्रातःकाले
- मन्दमन्दम् शनैः शनैः
- प्रत्यहम् प्रतिदिनम्
- शोभाम् सुन्दरताम्
- काञ्चनम् सुवर्णम्

विपरीतशब्दाः

- उषसि = सायंकाले
- मन्दमन्दम् शीघ्रम्

श्लोकः—3

**मा कातराः! स्पृशत मां प्रिय-पारतन्त्र्याः!**
**अद्यापि यन्न विहिता जननी स्वतन्त्रा।**
**यत्रेदमेव गदतीव ततिस्तरूणां**
**शाखाकदम्ब-कृत-मर्मरमातनोति ॥3॥**

अन्वयः – प्रिय-पारतन्त्र्या ! कातराः ! माम् मा स्पृशत यत् अद्य अपि जननी स्वतन्त्रा न विहिता ।

यत्र तरूणाम् ततिः इदम् एव गदति इव शाखाकदम्बकृत-मर्मरम् आतनोति ।

सन्धियुक्तपदानि

- अद्यापि अद्य +अपि
- यन्न यत् +न
- यत्रेदमेव यत्र + इदम् +एव
- गदतीव गदति + इव
- ततिस्तरुणाम् ततिः +तरुणाम्

समासविग्रहाः

- प्रिय-पारतन्त्र्याः प्रियं पारतन्त्रं येषाम् ते

समानार्थकशब्दाः

- कातराः भीताः

- स्वतन्त्रा स्वाधीना
- ततिः समूहः

विपरीतशब्दाः

- कातराः अकातराः

प्रत्ययाः

- स्वतन्त्रा स्वतन्त्र +टाप्
- जननी जनक + ङीप्

श्लोकः—4

वीराग्रणीरभय-युद्धकलाकलापः
क्वाऽस्तेऽद्य हा! स तनयः सनयः प्रतापी।
अत्रत्य-निर्जनवनेऽथ यदा कदाचिद्
मातेव रोदिति सखे! कुररी नु काचित् ॥4॥

अन्वयः – वीर-अग्रणीः अभय-युद्धकलाकलापः सः प्रतापी सनयः तनयः हा ! अद्य क्व आस्ते । अथ यदा कदाचित् अत्रत्य-निर्जनवने सखे ! काचित् कुररी नु माता इव रोदिति ।

सन्धियुक्तपदानि

- क्वाऽस्तेऽद्य क्व +आस्ते + अद्य
- मातेव माता + इव
- वीराग्रणीरभय वीर +अग्रणीः +अभय

समासविग्रहाः

- वीराग्रणी वीराणाम् अग्रणी
- अभयम् न भयम् इति
- निर्जनवने जनानान् अभावः इति तस्मिन् वने
- सनयः नयेन सहितः

समानार्थकशब्दाः

- क्व कुत्र
- तनयः पुत्रः
- सनयः नीतीज्ञ
- कुररी क्रौञ्चपक्षी

विपरीतशब्दाः

- कदाचित् सर्वदा

प्रत्ययाः

- प्रतापी प्रताप + इन्

श्लोकः—5

**पुष्पं फलं तदनु गन्धवहः समीरः**
**खद्योत-पंक्तिरमला च पिकालि-गीतिः।**
**अद्यापि यत्र सरल-प्रकृति-प्रणीतं**
**पञ्चोपचारमिव पूजनमस्ति मातुः ॥5॥**

अन्वयः-- पुष्पं फलं तदनु गन्धवहः समीरः अमला खद्योत-पंक्तिः पिकालि-गीतिः च । यत्र अद्य अपि सरल-प्रकृति-प्रणीतम् पञ्चोपचारम् इव मातुः पूजनम् अस्ति ।

सन्धियुक्तपदानि-

| | |
|---|---|
| • तदनु | तत् +अनु |
| • अद्यापि | अद्य +अपि |
| • पिकालि | पिक + आलि |
| • पञ्चोपचारमिव | पञ्च +उपचारम् +इव |

समासविग्रहाः

| | |
|---|---|
| • खद्योतपङ्क्तिः | खद्योतानाम् पङ्क्तिः |
| • पिकालिः | पिकानाम् आलिः |
| • पञ्चोपचारम् | पञ्चानाम् उपचाराणाम् समाहारः |
| • गन्धवहः | गन्धं वहति इति |

समानार्थकशब्दाः

| | |
|---|---|
| • गन्धवहः | वायुः |
| • समीरः | वायुः |
| • अमला | मलहीना, पवित्रम् |
| • आलिः | पङ्क्तिः |

विपरीतशब्दाः

| | |
|---|---|
| • अमला | मला |

प्रत्ययाः

| | |
|---|---|
| • पूजनम् | पूज् + ल्युट् |

श्लोकः—6

**नीलेन पक्ष-निवहेन खमाहसन्तः**
**चञ्च्वा फलानि विमलानि समञ्चयन्तः।**
**'श्रीराम' नाम मधुरं मधुरं क्वणन्तः**
**अद्यापि यत्र सुशुका विलसन्ति सन्तः ॥6॥**

अन्वयः -यत्र अद्य अपि सुशुकाः नीलेन पक्षनिवहेन खम् आहसन्तः विमलानि फलानि चञ्चा समञ्चयन्तः 'श्रीराम' नाम मधुरम् क्वणन्तः सन्तः (इव ) विलसन्ति ।

सन्धियुक्तपदानि

- समश्चयन्तः		सम् +अश्चयन्तः
- अद्यापि		अद्य + अपि
- सुशुका विलसन्ति		सुशुकाः + विलसन्ति

समासविग्रहाः

- श्रीरामनाम		श्रीरामस्य नाम् इति
- सुशुका		शोभनाः शुकाः इति

समानार्थकशब्दाः

- खम्		गगनम्
- विलसन्ति		शोभन्ते
- आहसन्तः		तिरस्कुर्वन्तः
- सन्तः		मुनयः,सज्जनाः

श्लोकः—7

अत्र प्रताप-नृपतेः प्रकट-प्रतापा
एकाऽपि हन्त! शतधाऽभवदस्त्र-धारा।
युद्धेऽधिकोशमपि शत्रुवधे क्रमेण
ज्योत्स्ना तमः -सहचरी चपलेति चित्रम् ॥7॥

अन्वयः - हन्त ! अत्र प्रताप -नृपतेः प्रकट -प्रतापा एका अपि शतधा अस्त्रधारा अभवत् । युद्धे शत्रुवधे अधिकोशम् अपि क्रमेण चपला ज्योत्स्ना तमः सहचरी इति चित्रम् (अस्ति)।

सन्धियुक्तपदानि

- एकाऽपि		एका + अपि
- चपलेति		चपला +इति
- युद्धेऽधिकोशम्		युद्धे +अधिकोशम्

समासविग्रहाः

- अस्त्रधारा		अस्त्राणाम् धारा
- अधिकोशम्		कोशम् इति
- सचरी		सह(सार्धम्) चरति इति

समानार्थकशब्दाः

- तमः		अन्धकारः
- सहचरी		सखी
- चपला		विद्युत्
- ज्योत्स्ना		चन्द्रिका

विपरीतशब्दाः

- तमः		आलोकः

प्रत्ययाः-		चपला		चपल + टाप्

श्लोकः—8

सैषा स्थली चकित-चेतकचङ्क्रमाणां
सैषा स्थली कुटिलकुन्तपराक्रमाणाम्।
सैषा स्थली प्रियतमाऽप्यसुतोऽमराणां
सैषा स्थली भयकरी नर-पामराणाम् ॥8॥

अन्वयः -चकित-चेतक-चङ्क्रमाणाम् सा एषा स्थली (अस्ति), कुटिलकुन्तपराक्रमाणाम् सा एषा स्थली(अस्ति), प्रियतम अपि असुतः अमराणाम् सा एषा स्थली (अस्ति),नर-पामराणाम् सा एषा स्थली भयकरी (अस्ति)।

सन्धियुक्तपदानि

- सैषा — सा + एषा
- प्रियतमाऽपि — प्रियतमा +अपि

समासविग्रहाः

- भयङ्करी — भयं करोति इति सा
- नर-पामराणाम् — नरेषु पामरः इति तेषाम्

समानार्थकशब्दाः

- स्थली — स्थानम्
- पामराणाम् — पापीनाम्
- चेतकः — अश्वः
- अमराणाम् — देवादेवीनाम्

विपरीतशब्दाः

- पामराणाम् — साधूनाम्

प्रत्ययाः

- स्थली — स्थल + ङीप्
- भयङ्करी — भयङ्कर +ङीप्
- प्रियतमा — प्रियतम + टाप्

श्लोकः—9

वीक्ष्य प्रभा हसित-चारु-पुरन्दराणां
सङ्गं स नृत्यममलं शिखिसुन्दराणाम्
सम्भासते वरभुवः सुषमात्युदारः
हर्षाङ्कितो हरितहीरक-कण्ठहारः ॥9॥

अन्वयः - हसित-चारु-पुरन्दराणाम् प्रभा शिखिसुन्दराणाम् सङ्गम् अमलम् नृत्यम् वीक्ष्य सः (स्थलः) हर्षाङ्कितः हरितहीरक-कण्ठहारः सुषमा अति उदारः वरभुवः सम्भासते।

सन्धियुक्तपदानि

- वीक्ष्य — वि + ईक्ष्य

- सुषमात्युदारः सुषमा +अति+उदारः
- हर्षाङ्कितो हरित हर्ष +अङ्कितः+हरित

समासविग्रहाः

- सम्भासते सम्यक् भासते इति
- वरभुवः वरा भूः इति तस्याः
- कण्ठहारः कण्ठाय हारः
- हरितहीरकम् हरितम् हीरकम्
- सुषमात्युदारः सुषमया अत्युदारः

समानार्थकशब्दाः

- वीक्ष्य दृष्ट्वा
- अमलम् पवित्रम्
- प्रभा सुन्दरता
- सुषमा सौन्दर्यम्
- हर्षाङ्कितः प्रसन्नः
- चारुः सुन्दरम्

विपरीतशब्दाः

- अमलम् मलम्

प्रत्ययाः = वीक्ष्य वि + ईक्ष् + ल्यप्

विशेष्यविशेषणपदानाम् मेलनम्

| विशेषणम् | विशेष्यम् |
|---|---|
| सुशोचिः | शाटी |
| पारतन्त्र्याः | कातराः |
| प्रतापी | तनयः |
| क्वणन्तः | सुशुकाः |
| शतधा | अस्त्रधारा |
| नीलेन | पक्षनिवहेन |
| अमला | खद्योतपङ्क्तिः |

प्रकृतिं प्रत्ययं विभज्य लिखत।

- विहिता वि +धा + क्त
- प्रतापी प्र +तप्+णिनि
- हसन्तः हस् +शतृ
- शिखी शिखा +इनि
- प्रणीतम् प्र +नी +क्त
- माननीया मान् + अनीयर्
- स्वाधीनता स्वाधीन +तल्
- सन्तः अस् + शतृ
- ततिः तन् + क्तिन्
- भासमाना भास् +शानच्

वाक्यांशैः सह सार्थक मेलनम्

क ख

- शाटीव सा जयति — काचन हल्दीघाटी
- मातेव रोदिति सखे — कुररी नु काचित्
- श्रीराम नाम मधुरम् — मधुरम् क्वणन्तः
- शोभां दधात्युषसि — काञ्चनकाञ्चनीयाम्

प्रसङ्गानुसारं सार्थकम् अर्थम् चित्वा लिखत ।

- खद्योतपंङ्क्तिरमला पिकालि-गीतिः।

आ) कोकिलः * आ) श्वानः इ)खगः

- वीक्ष्य प्रभा हसित- चारु -पुरन्दराणाम् ।

अ)देवतानाम् आ)इन्द्राणाम्* इ)पितृणाम्

- नीलेन पक्ष-निवहने खमाहसन्तः।

आ) जलम् आ) धराम् इ) आकाशम् *

- शोभां दधाति उषसि काञ्चनकाञ्चनीयाम्।

आ) प्रातःकाले * आ) दिवसे इ)रात्रौ

श्लोकं पठित्वा उत्तरत ।(श्लोकः-१)

**स्वाधीनताऽऽर्यभुवि मूर्तिमती समाना**
**राणाप्रताप-बलवीर्यविभासमाना।**
**आटीकते समुपमा नहि यां सुशोचिः**
**शाटीव सा जयति काचन हल्दिघाटी ॥1॥**

एकपदेन उत्तरत

अ) आर्यभुवि का मूर्तिमती समाना ?

आ) का नहि आटीकते ?

पूर्ण वाक्येन उत्तरत।

अ) आर्यभुवि स्वाधीनता कीदृशी आसीत् ?

आ)काचन का कथं जयति ?

यथा निर्देशम् उत्तरत ।

अ) काचन हल्दीघाटी -अत्र विशेष्यपदं किम् ?

आ)पृथीव्याम्-पदस्य पर्यायपदम् किम् ?

इ)साटीव सा जयति - "सा" पदं कस्मै प्रयुक्तम् ?

ई) आटीकते -क्रियापदस्य कर्तृपदम् किम् ?

## ॥ नवमः पाठः॥

## {{ मदालसा }}

**सन्धियुक्तपदानि**

| | |
|---|---|
| राजोद्यानम् | राजा + उद्यानम् |
| • कोकिलानाञ्च | कोकिलानाम् + च |
| • यूनो हृदयम् | यूनः + हृदयम् |
| • विद्याध्ययने | विद्या + अध्ययने |
| • अत्रैव | अत्र + एव |
| • ज्ञानोदधिस्तु | ज्ञान + उदधिः + तु |
| • अत एव | अतः + एव |
| • अन्यदेव | अन्यत् + एव |
| • अन्वेषणम् | अनु +एषणम् |
| • इत्यासीद् | इति + आसीत् |
| • यदहम् | यत् + अहम् |
| • आचार्येति | आचार्या + इति |
| • तथैव | तथा +एव |
| • नास्ति | न + अस्ति |
| • लतेयम् | लता +इयम् |
| • मातुरधीनम् | मातुः+अधीनम् |
| • यथाहं पश्यामि | यथा + अहम् + पश्यामि |
| • निर्जीवम् | निः + जीवम् |
| • हरिश्चन्द्रः | हरिः +चन्द्रः |
| • सत्यं खल्वेतत् | सत्यम् + खलु +एतत् |
| • नवोन्मेषः | नव + उन्मेष: |
| • गृहस्थाश्रमोऽपि | गृहस्थाश्रमः+अपि |
| • दुर्लभो जनः | दुर्लभः + जनः |
| • अवसरोऽयम् | अवसरः + अयम् |
| • अत एव | अतः + एव |
| • विचित्रो न्यायः | विचित्रः + न्यायः |
| • अन्वेषणम् | अनु + एषणम् |
| • इत्यस्ति | इति + अस्ति |
| • प्रत्युत्तरम् | प्रति + उत्तरम् |
| • आशीर्वचांसि | आशीः + वचांसि |
| • कोऽपि | कः + अपि |
| • मां भासयति | माम् + भासयति |
| • सदैव | सदा +एव |
| • धर्मार्थम् | धर्म + अर्थम् |
| • रक्षार्थम् | रक्षा + अर्थम् |
| • पूजायां न | पूजायाम् + न |

- त्वदधीनम् — त्वत् + अधीनम्

समासपदानि

- सखीस्नेहः — सख्याः स्नेहः
- पतिपत्न्यौ — पति च पत्नी च
- प्रीतिमतोः — प्रीतिम् अस्य अस्तीति तयोः
- त्रिवर्गम् — त्रयाणाम् वर्गाणाम् समाहारः
- शत्रुजितः — जिताः शत्रवः येन सः
- प्रत्युत्तरम् — उत्तरम् उत्तरम् प्रति
- नारीस्वाधीनताम् — नारीणाम् स्वाधीनता ताम्
- गन्धर्वकन्या — गन्धर्वस्य कन्या
- पितरौ — माता च पिता च
- राजोद्यानम् — राज्ञः उद्यानम्
- वामपार्श्वे — वामे पार्श्वे
- राजकुमारी — राज्ञः कुमारी
- ज्ञानोदधिः — ज्ञानस्य उदधिः
- सागरतटे — सगरस्य तटे
- विद्याध्यायने — विद्यायाः अध्ययने
- विनयशीले — विनयं शीलं यस्याः सा
- मधुरवचांसि — मधुराणि च तानि वचांसि इति
- विवाहबन्धनम् — विवाहस्य बन्धनम्
- सरसाम् — रसेन सहितम्
- जीवनपथे — जीवनस्य पथे
- जीवनयात्रायाम् — जीवनस्य यात्रयाम्
- पतिगृहम् — पत्युः गृहम्
- गृहस्थाश्रमम् — गृहस्थस्य आश्रमम्
- मनोरथः — मनसः रथ
- प्रयोगशाला — प्रयोगाय शाला
- चरित्रनिर्माणम् — चरित्रस्य निर्माणम्
- जनसङ्कुले — जनानाम् सङ्कुलेः
- स्वप्रकृत्यनुकुलः — स्वस्य प्रकृत्याः अनुकूलः
- स्वाधिपत्यम् — स्वस्य अधिपत्यम्

प्रत्ययाः

- दृष्ट्वा — दृश् + क्त्वा
- श्रुत्वा — श्रु + क्त्वा
- स्थित्वा — स्था + क्त्वा
- अधिकृत्य — अधि + कृ +ल्यप्
- स्वीकर्तुम् — स्वी +कृ +तुमन्
- नर्तितुम् — नृत् +तुमुन्
- विधाय — वि +धा+ ल्यप्
- मन्यमानः — मन् + शानच्

| | |
|---|---|
| • कर्तुम् | कृ + तुमुन् |
| • रक्षितव्या | रक्ष् + तव्यत् |
| • प्राप्ता | प्र + आप् + क्त |
| • अधिकृत्य | अधि + कृ + ल्यप् |
| • कथितम् | कथ् + क्त |
| • मतम् | मन् + क्त |
| • चलितुम् | चल्+ तुमुन् |
| • प्रविश्य | प्र +विश् + ल्यप् |
| • परीक्ष्य | परि + ईक्ष् + ल्यप् |
| • अर्जयित्वा | अर्ज् + क्त्वा |
| • दीयमानम् | दा + शानच् |
| • सूचितम् | सूच् + क्त |
| • अन्वेषणम् | अनु + इष् +ल्युट् |
| • एकाकिनी | एकाकिन् + ङीप् |
| • प्रष्टुम् | प्रच्छ् + तुमुन् |

समानार्थकशब्दाः

| | |
|---|---|
| • कोकिलानाम् | पिकानाम् |
| • यूनः | युवकस्य |
| • भणसि | वदसि |
| • वरः | पतिः |
| • मतम् | विचारम् |
| • सहचरम् | मित्रम् |
| • तूष्णीम् | मौनम् |
| • दिष्ट्या | भाग्येन |
| • प्रभूतम् | अत्यधिकम् |
| • ईहे | इच्छामि |

विशेष्यविशेषणपदानाम् मेलनम्

| विशेषणम् | विशेष्यम् |
|---|---|
| • गभीरः | ज्ञानोदधिः |
| • विभिन्नप्रकृतिकाः | पुरुषाः |
| • जनसङ्कुले | आपणे |
| • अनुव्रतौ | पतिपत्न्यौ |
| • निर्जिवम् | वस्तु |
| • शत्रुजितः | ऋतध्वजः |
| • प्रभूतम् | धनम् |

वाक्यांशैः सह सार्थक मेलनम्

| क | ख |
|---|---|
| • परीक्षार्थमुद्यतोऽस्मि | गृहस्थाश्रमप्रयोगशालायाम् |
| • लक्ष्म्याः रक्षार्थम् | पत्न्याः सहयोगः अनिवार्यः |

- अपि श्रुताः भवद्भिः मम सखीविचाराः
- ज्ञानोदधिस्तु अनन्तपारो गभीरश्च

प्रसङ्गानुसारं सार्थकम् अर्थम् चित्वा लिखत ।

- योग्यवरस्य अन्वेषणकार्यम् इत्यासीत् गुरुपादानाम् <u>मतम्</u> ।

अ) भाषणम् आ) विचारः * इ) गमनम्

- पुरुषः <u>भार्यायाम्</u> स्वाधिपत्यम् स्थापयति ।

अ) पुत्रे आ) पित्रोः इ) पत्न्याम्*

- विद्या ददाति विनयम् अत एव एवं <u>भणसि</u> ।

अ) वदसि* आ) चलसि इ) गच्छसि

- मत्कृते आवश्यकता नास्ति <u>अवलम्बनस्य ।</u>

अ) वित्तस्य आ) श्रमस्य इ)सहायतायाः*

नाट्यांशम् पठित्वा उत्तरत।

*(ततः प्रविशति प्रकृतिसौन्दर्यमवलोकयन् महाराजस्य शत्रुजितः पुत्रः ऋतध्वजः)*

**ऋतध्वजः -** अहो शोभनं गन्धर्वराजविश्वावसोः राजोद्यानम्। आम्रमञ्जरीणां परां शोभां दृष्ट्वा कोकिलानां च मधुरवचांसि श्रुत्वा कस्य यूनो हृदयं सहसा उत्कण्ठितं न भविष्यति?

वामपार्श्वे रमणीनामालाप इव श्रूयते। अत्रैव स्थित्वा श्रोष्यामि।

**कुण्डला -** सखि मदालसे! त्वं तु केवलं विद्याध्ययने एव रता कियन्तं कालं यावत् ब्रह्मचर्यव्रतं धारयिष्यसि?

**मदालसा -** ज्ञानोदधिस्तु अनन्तपारो गभीरश्च। मया सागरतटे स्थित्वा कतिपयबिन्दव एव प्राप्ता अद्यावधि।

**कुण्डला -** विनयशीले! विद्या ददाति विनयम् अत एव एवं भणसि। कुलगुरु-तुम्बरुमहाभागैस्तु गन्धर्वराजाय अन्यदेव सूचितम्।

**मदालसा -** किं श्रुतं त्वया यद् गुरुवर्यैः माम् अधिकृत्य पित्रे कथितम्?

**कुण्डला -** अथ किम्। राजकुमारी मदालसा सर्वविद्यानिष्णाता जाता परं तया स्वयं वरः न प्राप्तः अतः तस्यै योग्यवरस्य अन्वेषणं कार्यम् इत्यासीद् गुरुपादानां मतम्।

एकपदेन उत्तरत

अ) ततः कः प्रविशति ?

आ) कोकिलानाम् कानि श्रुत्वा हृदयम् उत्कण्ठितम् भवति ?

पूर्णवाक्येन उत्तरत।

अ) वामपार्श्वे किं श्रूयते ?

आ) का ब्रह्मचर्यव्रतं धारयिष्यति ?

यथानिर्देशम् उत्तरत ।

अ) परां शोभाम् -अत्र विशेषणपदं किम् ?

आ) युवकस्य -पदस्य पर्यायपदम् किम् ?

इ) त्वम् तु केवलम् विद्या – अत्र 'त्वम्' सर्वनामपदम्  कस्मै प्रयुक्तम् ?

ई) श्रोष्यामि -क्रियापदस्य कर्तृपदम् किम्  ?

॥ दशमः पाठः ॥

## {{ प्रतीक्षा }}

श्लोकः-- 1

प्रतीक्षेऽहं तव कृते दिनं दिनम्
रजनीं रजनीं च
न जातु दर्शनं ददासि मे,
किं तावन्मे सा प्रतीक्षा?
तस्यां मे चांचल्यपरिपूरितायां प्रतीक्षायाम्
कुत्र वा विद्यते स्थानम्
अवस्थानाय तव पूर्णतया?

सन्धियुक्तपदानि

- प्रतीक्षेऽहं — प्रतीक्षे + अहं
- तावन्मे — तावत् + मे
- पूरयितायां प्रतीक्षायाम् — पूरयितायाम् +प्रतीक्षायाम्

समासविग्रहाः

- चाञ्चल्यपरिपूरितायाम् — चाञ्चल्येन परिपूरिता इति तस्याम्

समानार्थकशब्दाः

- रजनीम् — रात्रिम्
- वा — अथवा
- जातु — कदापि
- मे — मम

विपरीतशब्दाः

- रजनी — दिवसः

प्रत्ययाः

- पूरिता — पूर् + क्त

श्लोकः-- 2

यदा वा दृश्यते,
रूपस्यार्धाधिकं तदा तव
लोचनविषयातीतं भूत्वा तिष्ठति।
यत् किंचिदपि दृश्यते
तथापि न भजति स्पष्टरूपताम्
यतस्तत् समाच्छन्नमेव भवति
अशान्ति-प्रसूतैर्मे
स्मृति-दृश्याभिलाषैर्बहुविधैः,

सन्धियुक्तपदानि

- रुपस्यार्धाधिकम्    रुपस्य + अर्ध + अधिकम्
- किञ्चिदपि    किञ्चित् + अपि
- तथापि    तथा +अपि
- यतस्तत्    यतः +तत्
- प्रसूतैर्मे    प्रसूतैः +मे
- दृश्याभिलाषैर्बहुविधैः    दृश्य + अभिलाषैः + बहुर्विधैः

समासविग्रहाः

- अर्धाधिकम्    अर्धम् अधिकम् इति
- लोचनविषयातीतम्    लोचनस्य विषयम् अतीतः (तम्)
- अशान्तिः    न शान्तिः
- स्मृति-दृश्याभिलाषैः    स्मृत्याः दृश्यस्य अभिलाषः इति तैः

समानार्थकशब्दाः

- लोचनम्    नेत्रम्

विपरीतशब्दाः

- अशान्तिः    शान्तिः

श्लोकः—3

**अथ वा दृश्यते स्फुरज्जलवक्षसि**
**छायेव पादपानामुपकूलवर्तिनाम्।**
**दृष्टे सति कस्यचिन्नाम्नो रूपे**
**स्थाने तस्योपजायमानं दृश्यते**
**अन्यच्चन किंचन रूपं नामान्तर-चिह्नितम्।**
**एकमेव रुपं भूत्वा।**

सन्धियुक्तपदानि

- स्फुरज्जलवक्षसि    स्फुरत् + जलवक्षसि
- छायेव    छाया + एव
- अन्यच्च    अन्यत् + च
- नामान्तर    नाम + अन्तर
- रुपं भूत्वा    रुपम् + भूत्वा
- तस्योपजायमानम्    तस्य + उपजायमानम्

समासविग्रहाः

- स्फुरज्जलवक्षसि    स्फुरतः जलस्य वक्षः इति तस्मिन्
- उपकूलवर्तिताम्    कूलस्य समीपम् इति तेषाम्

प्रत्ययाः

- जायमानम्    जन् + शानच्

श्लोकः—4

हन्त नाहं भाजनमभवमेतावताऽपि कालेन
एकमेव रूपं कर्तुमात्मनः पूर्णतया।

कियान् पुनः कालो वर्तते शेषः
यदहं चिन्तयिष्यामि
यदसि त्वं तद्रूपतयाऽऽगत्य
एकदा समुपस्थास्यसि मदन्तिके
निर्जनवेलायां मे परमायुषः?

सन्धियुक्तपदानि

- नाहम् — न + अहम्
- कालो वर्तते — कालः + वर्तते
- मदन्तिके — मत् + अन्तिके
- तद्रूपतयाऽऽगत्य — तत् + रूपतया +आगत्य
- परमायुषः — परम + आयुषः

समासविग्रहाः

- परमायुषः — परमम् आयुषः
- निर्जनम् — जनानाम् अभावः इति
- तद्रूपतया — तस्य रुपता इति तया

समानार्थकशब्दाः

- भाजनम् — योग्यम्
- शेषः — अवशेषः
- मदन्तिके — मम समीपे
- परमायुषः — दीर्घायुः

प्रत्ययाः

- कर्तुम् — कृ + तुमुन्
- पूर्णता — पूर्ण + तल्

विशेष्यविशेषणपदानाम् मेलनम्

| विशेषणम् | विशेष्यम् |
|---|---|
| शेषः | कालः |
| बहुविधैः | दृश्याभिलाषैः |
| उपकूलवर्तितानाम् | पादपानाम् |
| नामान्तरचिह्नितम् | रूपम् |

वाक्यांशैः सह सार्थकमेलनम्

| क | ख |
|---|---|
| हन्त नाहं भाजनम् | अभवमेतावताऽपिकालेन |
| रूपस्यार्धाधिकं तदा तव | लोचनविषयातीतम् भूत्वा तिष्ठति |

- तथापि न भजति स्पष्टरूपताम्
- कुत्र वा विद्यते स्थानम् अवस्थानाय तव पूर्णतया

प्रसङ्गानुसारं सार्थकम् अर्थम् चित्वा लिखत ।

- न जातु दर्शनम् ददासि मे ।

इ) कदापि* आ) अधुना इ)तदा

- नाहम् -भाजनमभवम्।

अ) रचनीम् आ) पात्रम्* इ) दिनम्

- एकदा समुपस्थास्यसि मदन्तिके ।

इ) मद्दुरे आ) कुत्र इ) मत्पार्श्वे*

- अशान्ति- प्रसूतैर्मे।

इ) उत्पन्नैः * आ) विपन्नैः इ)आरोपितैः

श्लोकं पठित्वा उत्तरत । (श्लोक-१)

**प्रतीक्षेऽहं तव कृते दिनं दिनम्**
**रजनीं रजनीं च**
**न जातु दर्शनं ददासि मे,**
**किं तावन्मे सा प्रतीक्षा?**
**तस्यां मे चांचल्यपरिपूरितायां प्रतीक्षायाम्**
**कुत्र वा विद्यते स्थानम्**
**अवस्थानाय तव पूर्णतया?**

एकपदेन उत्तरत |

अ) मे किम् न ददासि त्वम् ?

आ) तावन्मे सा का अस्ति ?

पूर्ण वाक्येन उत्तरत।

अ) राधा कीदृश्यां प्रतीक्षायाम् अस्ति ?

आ) तव कृते अहं कदा प्रतीक्षे ?

यथानिर्देशम् उत्तरत ।

अ) सा प्रतीक्षा -अत्र विशेष्य पदं किम् ?

आ) मम -पदस्य पर्यायपदम् किम् ?

इ) तस्यां मे चांचल्य..... – अत्र ‘त्वम्’ सर्वनामपदम् कस्मै प्रयुक्तम् ?

ई) अहम् - कर्तृपदस्य क्रियापदम् किम् ?

श्लोकं पठित्वा उत्तरत । (श्लोकः-४)

हन्त नाहं भाजनमभवमेतावताऽपि कालेन
एकमेव रूपं कर्तुमात्मनः पूर्णतया।

कियान् पुनः कालो वर्तते शेषः
यदहं चिन्तयिष्यामि
यदसि त्वं तद्रूपतयाऽऽगत्य
एकदा समुपस्थास्यसि मदन्तिके
निर्जनवेलायां मे परमायुषः?

एकपदेन उत्तरत |

अ) कियान् पुनः कः शेषः वर्तते ?

आ) त्वम् कयाऽऽगत्य असि ?

पूर्ण वाक्येन उत्तरत।

अ) अहं पूर्णतया किं न अभवत् ?

आ) मदन्तिके कदा समुपस्थास्यसि ?

यथानिर्देशम् उत्तरत ।

अ) सा प्रतीक्षा -अत्र विशेष्य पदं किम् ?

आ) समये -पदस्य पर्यायपदम् किम् ?

इ) हन्त नाहम् भाजनम्….. – अत्र 'अहम्' सर्वनामपदम् कस्मै प्रयुक्तम् ?

ई) चिन्तयिष्यामि - क्रियापदस्य कर्तृपदम् किम् ?

## पाठाधारित-संस्कृत-साहित्यपरिचयः

1. प्रथमः पाठः- चत्वारः वेदाः( ऋग्वेदः,यजुर्वेदः,सामवेदः,अथर्ववेदः)
   चतुर्णाम् वेदानाम् पृथक् उपनिषदः सन्ति ।
   ईश-केन-कठ-प्रश्न-मुण्डकमाण्डुक्य-तैत्तिरीय -बृहदारण्यक-छान्द्योग्य-ऐतरेय- शेताश्वतर-प्रधानाः सन्ति ।
   कृष्णयजुर्वेदस्य तैत्तिरीयोपनिषदतः एकादशः अनुवाक(शिक्षावल्ली)

2.द्वितीयः पाठः- न त्वम् शोचितुमर्हसि

काव्यम्---बुद्धचरितम् महाकाव्यम् (सप्तदश सर्गाः )

कविः – अश्वघोषः

कालः- ईशायाः प्रथमशताब्दी

विषयः- बुद्धदेवस्य सर्वाङ्गीणचरितम्

कवेः अन्यकृतयः- सौन्दरानन्दम् ,बुद्धचरितम् ,शारिपुत्रप्रकरणम्

3.तृतीय: पाठः- मातुराज्ञा गरीयसी

नाटकम् ---प्रतिमा नाटकम् (सप्ताङ्कः परिमितः )

नाट्यकारः – भासः

कालः- ई.पू.  चतुर्थशताब्दी

विषयः- रामवनवासात् आरभ्यः रावणवधपर्यन्तम् कथा वर्णिता

अन्यकृतयः-  स्वप्नवासवदत्तम् , प्रतिज्ञायौगन्धनारायणम्,कर्णभारम्,चारुदत्तम् .....

4.चतुर्थः पाठः - प्रजानुरञ्जकः नृपः

महाकाव्यम्---रघुवंशम्

कविः – कालिदासः

कालः- ई.पू. द्वितीयशताब्दी

विषयः- रघुकुलनृपाणाम् गुणवर्णनम्

कवेः अन्यकृतयः-  कुमारसंम्भवम्,अभिज्ञानशाकुन्तलम्, मालविकाग्निमित्रम् विक्रोमोर्वशीयम् , मेघदूतम् ,ऋतुसंहारम्....

5.पञ्चमः पाठः- दौवारिकस्य निष्ठा

उपन्यासः -शिवराजविजयः

लेखकः- पं अम्बिकादत्त व्यासः

कालः-  1859-1900 ई.

विषयः- स्वतन्त्रता संग्रामस्य कथा

6.षष्ठः पाठः – सूक्ति-सौरभम्

काव्यम्---भिन्नपुस्तकेषु संगृहीतम्

कविः – चाणक्यः ,भतृहरिः विष्णुशर्मा, मङ्गलदेववः शास्त्री,  विल्हणः

कालः- अन्ते  सर्वेषाम् विषये प्रदत्तम्

विषयः- भिन्नविषयाः

7.सप्तम पाठः -नैकेनापि समं गता वसुमती

लेखकः----बल्लालसेनः

पाठः – भोजप्रबन्धः(भोजराजस्य राज्यप्राप्तिप्रबन्धः)

विषयः- संसारस्य नश्वरता

8.अष्टमः पाठः -हल्दीघाटी

लेखकः=श्री ईशदत्त शास्त्री

खण्डकाव्यम् – प्रतापविजयः

विषयः  -         हल्दीघाटी युद्धस्य विवरणम्

9. नवमः पाठः- मदालसा

नाटकम् ---पुरन्ध्रीपञ्चकम् (तृतीय ऋपकम् )

नाट्यकारः – आचार्य: वेदप्रकाश: घई

विषयः- मदालसायाः स्वाभिमानविषये वर्णनम्

10. दशमः पाठः – प्रतीक्षा

कविः - रमाकान्तः रथः

कविता – श्रीराधा

संस्कृत-अनुवादकः – श्री गोविन्द चन्द्र उद्गाता

विषयः – श्री राधा रुपदर्शनम्

| कविपरिचय: | | | |
|---|---|---|---|
| कवि: | देश: | काल: | कृति: |
| कालिदास: | उज्जयिनी | ई. पू .प्रथमशताब्दी | रघुवंशम् , कुमारसम्भवम् , मेघदूतम् , अभिज्ञानशाकुन्तलम् , मालविकाग्निमित्रम् , विक्रमोर्वशीयम् , ऋतुसंहारम् |
| भारवि: | अचलपुरम् | षष्ठशताब्दी | किरातार्जुनीयम् |
| माघ: | गुर्जर: | पञ्चमशताब्दी | शिशुपालवधम् |
| श्रीहर्ष: | कान्यकुब्ज: | द्वादशशताब्दी | नैषधीयचरितम् |
| भोज: | धारानगरी | चतुर्थशताब्दी | चम्पूरामायणम् , सरस्वतीकण्ठाभरणम् |
| बाणभट्ट: | कान्यकुब्ज: | सप्तमशताब्दी | कादम्बरी , हर्षचरितम् |
| भर्तृहरि: | | षष्ठशताब्दी | वाक्यपदीयम् , नीतिशतकम , शृङ्गारशतकम् , वैराग्यशतकम् |
| आर्यभट: | कुसुमपुरी | पञ्चमशताब्दी | आर्यभटीयम् |
| कोटिल्य: (चाणक्य:) | तक्षशिला | | अर्थशाश्त्रम् , चाणक्यनीति: |
| भवभूति: | विदर्भ: (पद्मपुरम्) | सप्तमशताब्दी | उत्तररामचरितम् |
| भास: | उत्तरभारतवासी | ई. पू .चतुर्थशताब्दी | प्रतिज्ञायौगन्धरायणम् , स्वप्नवासवदत्तम् , चारुदत्तम् , कर्णभारम् , इत्यादि चतुर्दशनाटकानि |
| सुश्रुत: | | द्वितीयशताब्दी | सुश्रुतसंहिता |
| वराहमिहिर: | अवन्ती | षष्ठशताब्दी | बृहत्संहिता |
| विष्णुशर्मा | महिलारोप्यनगरम् | द्वितीयशताब्दी | पञ्चतन्त्रम् |
| अम्बिकादत्तव्यास: | जयपुरम् | नवदशशताब्दी | शिवराजविजयम् |
| दण्डी | काञ्चीपुरी | सप्तमशताब्दी | दशकुमारचरितम् , काव्यादर्श: |
| जयदेव: | वङ्गदेश: | एकादशशताब्दी | गीतगोविन्दम् |
| नारयणशर्मा | | | हितोपदेश: |
| वाल्मीकि: | | | रामायणम् |
| व्यासदेव: | | | पुराणानि , महाभारतम् |
| अश्वघोष: | | | बुद्धचरितम् |
| सोमदेव: | | | कथासरित्सागरम् |
| आर्यशूर: | | | जातकमाला |
| चरक: | | | चरकसंहिता |
| वेदकुमारी घई | | | पुरन्ध्रीपञ्चकम् |
| मथुराप्रसाददीक्षित: | | | भारतविजयनाटकम् |
| बल्लालसेन: | | | भोजप्रबन्ध: |

| | | | |
|---|---|---|---|
| पतञ्जलिः | | | महाभाष्यम् |
| शुद्रकः | | | मृच्छकटिकम् |

## निम्नलिखित प्रश्नानाम् उत्तराणि लिखत ।

(1.) एकस्य उपनिषदः नाम लिखत ।

(2). संस्कृत-शब्दस्य व्युत्पत्तिः...... ?

(3). रामायणे कति काण्डानि सन्ति ?

(4). 'ऋतुसंहारम्' काव्यस्य रचयिता कः ?

(5) काव्यम् कति विधा ?

(6) मुद्राराक्षसनाटकं क: अरचयत् ?

(7) पुराणानि कति ?

(8) ------काव्यं गद्यपद्यात्मकम् अस्ति ?

(9) सर्वप्राचीनः वेदः कः ?

(10) नीतिशतकम्–केन विरचितम्?

(11) श्रव्य काव्यम्-कति विधा ?

(12) एक-महाकाव्यस्य नाम लिखत ?

(13) महाभारते कति श्लोकाः सन्ति ?

(14) रामायणे कयोः युद्धविषये वर्णितम् ?

(15) रामायणस्य आदिकाण्डस्य नाम किम् ?

**1.प्रश्नानाम् उत्तराणि लिखत –**

(i) प्रथम: वेद: क: ?

(ii) जयदेव: किं रचितवान् ?

(iii) रामायणस्य नायिका का ?

(iv) क: अष्टाध्यायी रचितवान् ?

(v) दण्डी किम् रचितवान् ?

(vi) वेणीसंहारनाटकम् क: अरचयत् ?

(vii) नीतिशतकं क: अलिखत् ?

(viii) पञ्चतन्त्रस्य प्रथमतन्त्रस्य नाम किम् ?

(ix) अर्थशास्त्रस्य रचयिता क: ?

(x) रावणवधम् कस्य रचना ?

(xi) रघुवंशम् कीदृशं काव्यम् ?

(xii) रामायणे कति श्लोका: सन्ति ?

(xiii) अभिमन्यु: कस्य पुत्र: ?

(xiv) वेदस्य अन्यनाम किम् ?

(xv) श्रीमद्भगवद्गीताम् क: अरचयत् ?

(xvi) वेदा: कति सन्ति?

(xvii) गीतगोविन्दस्य कर्त्ता क: ?

(xviii) रामायणस्य नायकस्य नाम किम् ?

(xix) कविषु श्रेष्ठ: क: ?

(xx) बाणभट्ट: किम् रचितवान् ?

(xxi) मुद्राराक्षसनाटकं क: अरचयत् ?

(xxii) पुराणानि कति ?

(xxiii) पुराणानां रचयिता क:?

(xxiv) रामायणे कति कण्डानि सन्ति ?

(xxv) व्यासस्य अन्यनाम किम् ?

(xxvi) रघुवंशम् केन विरचितम् ?

(xxvii) महाभारते कति श्लोका: सन्ति ?

(xxviii) पञ्चतन्त्रम् केन विरचितम् ?

(xxix) मनुस्मृतौ कति अध्याया: सन्ति ?

(xxx) श्रीमद्भगवद्गीता कस्य ग्रन्थस्य अंश: ?

2.(i) कविकुलगुरु: _______ भवति ।

(ii) नान्दीं _______ पठति ।

(iii) खण्डकाव्यस्य अपरं नाम ______ अस्ति ।

(iv) सुश्रुतसंहिता _______ ग्रन्थ: अस्ति ।

(v) छन्दोरहितरचना ______ अभिधीयते ।

(vi) पञ्चतन्त्रस्य लेखक: _______ अस्ति ।

(vii) महाकाव्यं _______ विभक्तं भवति ।

(viii) नाटकेषु वृद्धसेवक: _______ कथ्यते ।

(ix) कौटिल्यस्य अपरं नाम _______ अपि अस्ति ।

(x)______ प्रथम: वेद: ।

(xi) अर्वाचीन: वेद: _______ ।

(xii) श्रीमद्भगवद्गीतायां _______ अध्याया: सन्ति ।

(xiii) अभिज्ञानशाकुन्तलस्य नाटकस्य रचयिता ______ अस्ति ।

(xiv) रामायणस्य अन्य नाम ______ अस्ति ।

(xv) महाभारतस्य रचयिता _______ अस्ति

**अभ्यास पत्रिका-१**

**केन्द्रीय -विद्यालय-संगठनम्**

**विषयः – संस्कृतम्(केन्द्रिकम्) SANSKRIT (CORE) (322)**

कक्षा - द्वादशी (XII ) समयः-होरात्रयम् पूर्णाङ्काः- 80

| |
|---|
| **अपठितावबोधनम् (क) -10** अङ्काः |
| रचनात्मककार्यम् **(ख) -15**अङ्काः |
| अनुप्रयुक्तव्याकरणम् **(ग) -20**अङ्काः |
| पठित**-**अवबोधनम् (घ) _**25**अङ्क |
| संस्कृतसाहित्येतिहासस्य परिचयः -10 |

निर्देशाः –

.1अस्मिन् प्रश्नपत्रे चत्वारःखण्डाःसन्ति।

.2सर्वे प्रश्नाःअनिवार्याः।

.3प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि ।

.4प्रश्नसंख्या अवश्यं लेखनीया।

.5उत्तराणि संस्कृते एव लेखनीयानि

**क-खण्डः ( अपठित-अवबोधनम् ) 10 अङ्का:**

1) अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 10

मानवजीवनस्य संस्करणं यया क्रियते सा संस्कृतिः कथ्यते । अस्माकं ये उच्चादर्शाः सन्ति तत् सर्वम् अस्माकं संस्कृतिः भवति । भारतीयसंस्कृतिः आध्यात्मिकी अस्ति । भारतीयसंस्कृतौ धर्मस्य व्यापक-व्याख्या अस्ति । कस्यापि देशस्य शरीरं तु तस्य भूमिः भवति , परम् आत्मा संस्कृतिः एव भवति । भारतीया संस्कृतिः विश्वे प्रसिद्धा अस्ति । ईश्वरं प्रति भक्तिभावना संस्कृतेः मूलं भवति । भारतीयानां ईश्वरे दृढः विश्वासः अस्ति । सत्ये, धर्मे , अहिंसायाम् , ईश्वरस्य भक्तौ , धार्मिकग्रन्थेषु च अस्माकं दृढो विश्वासः अस्ति । भारतीय-संस्कृतेः मूलं वेदाः सन्ति । वेदाः विश्वस्य सर्वप्राचीनाः ग्रन्थाः सन्ति । वेदाः चत्वारः सन्ति । ऋग्वेदः,यजुर्वेदः,सामवेदः,अथर्ववेदः च । वेदेष्वेव सर्वविधं ज्ञानम् मूलस्रोतरूपेण सन्निहितम् अस्ति ।

अ. एकपदेन उत्तरत - 2

क) का आध्यात्मिकी भवति ?

ख) कति वेदाः सन्ति ?

आ. पूर्णवाक्येन उत्तरत - 4

क) कस्यापि देशस्य आत्मा क: भवति ।

ख) वेदेषु किं कथं सन्निहितम् अस्ति ?

इ. प्रद्त्तेभ्यः विकल्पेभ्यः उचितम् उत्तरं चित्वा , निर्देशानुसारं लिखत - 3

क) 'पुस्तकानि' इति अर्थे किं पदम् अस्ति ?

अ) सर्वविधम् ब) उपदेशाः स) ग्रन्थाः द) वेदा:

ख) 'संस्कृतिः प्रसिद्धा अस्ति' । अत्र विशेष्यपदं किम् ?

अ) कृतिः ब) प्रसिद्धा स) संस्कृतिः द) सिद्धा

ग) 'शरीरं तु तस्य….' अत्र 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

अ) संस्कृतये  ब) धर्माय  स) शरीराय  द) देशाय

ई. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत -  1

## <u>ख-खण्डः ( रचनात्मककार्यम् ) 15 अङ्का:</u>

2. भवान् प्रणवः । स्वमित्रं देवेन्द्रं प्रति 'पशुपक्षिभिः सह क्रूरव्यवहारात् निषेधयितुं' लिखितं पत्रं मञ्जूषायां प्रदत्तपदैः पूरयत ।  5

जगन्नाथनिलयम् ,
1) .......................
तिथिः .............

प्रियमित्र ( 2 ) ............................. !
सस्नेहं नमस्ते ।
त्वया लिखितं पत्रम् इदानीमेव (3 ) .......। एतत् ज्ञात्वा च अहम् अतीव प्रसन्नः ,यत् त्वं वार्षिकक्रीडासमारोहे धावनप्रतियोगितायां (4 ) ........ प्राप्तवान् । मम एकं (5) ............ अस्ति , यत् अस्माभिः निस्सहायानां पशु-पक्षिणां ( 6 ) ................ न नाशयितव्यः । एतैः प्रकृतेः शोभा वर्धते । एतेषां रक्षणं (7) ......... परमकर्तव्यम् अस्ति । धनसम्पादनाय केचन पशून् पक्षिणः च हत्वा (8)......... कुर्वन्ति । अतः भवान् अपि एतादृश-जनानां (9) ........... गत्वा तान् 'तथा मा कुर्वन्तु' इति प्रार्थयतु । गृहे सर्वेभ्यः यथायोग्यम् अभिनन्दनम् ।

तव
(10)................... मञ्जूषा :-
प्रणवः

निवेदनम् , प्राप्तम् , अस्माकं , जीवनाधारः , समीपं , सुहृत् , व्यापारं , स्वर्णपदकं , पुरीतः , देवेन्द्र

3.मञ्जूषाप्रदत्तशब्दानाम् सहायतया अधोलिखितायां लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुनः लिखत ।

½ x10= 5

मञ्जूषा- ( च , हार्दिकम् , शृंगारम् , आगमनेनैव , ऋतुः , राजा , प्रफुल्लिता ,

तारुण्यम् , अतएव , आकार्यत् )

वसन्त-ऋतुनाम् १.......... कथ्यते । २...............अयं .........३....ऋतुराजवसन्त नाम्ना ..४....। प्रकृतिः ऋतुराजस्य वसन्तस्य ..५.......अभिनन्दनम् स्वागतम् ......६.....करोति ।

वसन्तः प्रकृतिकामिन्यः..... ७..........करोति। वस्तुतः प्रकृतेः....८......अस्ति । यतः अस्यऋतोः....९.....प्रकृति......१०.....जायते।

4. संस्कृत भाषया अनुवादम् कृत्वा लिखित ।  1x5=5

१.पूर्व काल में अयोध्या में दशरथ नामके एक राजा थे। -

२.तुम ही मेरे शरण हो।

३.राम और सीता के साथ लक्षण भी वनवास गया था। -

४.माँ बरतन में चावल पका रही है।

५.पिताजी आज मुझे दूरसंचार देंगे। -

<u>अथवा</u>

'मम प्रियपुस्तकम् ' इति विषये मञ्जूषा-प्रदत्त-पदानां साहाय्येन पञ्च वाक्यानि लिखत –

मञ्जूषा : श्रीमद्भगवद्गीता , श्रीकृष्णः , अर्जुनः , मम प्रियपुस्तकम् , महाभारतस्य ,कर्मविषये , उपदिशति , प्रसिद्ध-वाक्यम् , युद्धसमये , कर्मसिद्धान्तः ।

## <u>ग-खण्डः ( अनुप्रयुक्तव्याकरणम् ) 20 अङ्का:</u>

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिम् , विच्छेदं वा कुरुत - 6

i) उत्तरस्यां दिशि हिमालयः नाम <u>अति + उन्नतः</u> पर्वतः विराजते ।

(क) अत्युन्नत: (ख) अत्योन्नत: (ग) अत्यौन्नत: (घ) अतीन्नत:

ii) प्रत्येकम् अयनस्य अवधि: <u>षण्मासा:</u> ।

(क) षण्+मासा: (ख) षट्+मासा: (ग) षन्+मासा: (घ) सत्+मासा:

iii) अयथाकालं <u>समागत: + अस्ति</u> ।

(क) समागतास्ति (ख) समागतेऽस्ति (ग) समागतोऽस्ति (घ) समागतरस्ति

iv) य: <u>इच्छत्यात्मन:</u> श्रेय: ।

(क) इच्छत्+यात्मन: (ख)इच्छत्य+आत्मन: (ग) इच्छतु+आत्मन: (घ) इच्छति+आत्मन:

v) शिवस्य एकं <u>नयनम्</u> अग्निम् प्रसरति ।

(क) नय्+अनम् (ख) नी+अनम् (ग) ने+अनम् (घ) नो+अनम्

vi)<u>दन्तास्ते</u> गणयिष्यामि ।

(क) दन्ताः+ ते (ख) दन्त+ आस्ते (ग) दन्ता+ आस्ते (घ) दन्ता+स्ते

6. अधोलिखित-वाक्यानां रेखाङ्कितपदेषु समासं विग्रहं वा प्रदत्तविकल्पेभ्यःचित्वा लिखत - 5

i) अस्मिन् विद्यालये <u>रामः च कृष्णः च</u> द्वे मित्रे आस्ताम् ।

अ) रामकृष्णः ब) रामकृष्णाः स) रामकृष्णौ द) रामौ कृष्णौ

ii) <u>प्रच्छन्नभाग्य:</u> विद्यापराङ्मुख: आसीत् ।

अ) प्रच्छन्ने भाग्ये यस्य स: ब) प्रच्छन्नं भाग्यं यस्य स: स) प्रच्छन्न: भाग्य: द) प्रच्छन्न: भाग्य: स:

iii) <u>उपगङ्गम्</u> काशीक्षेत्रम् अस्ति ।

अ) गङ्गायाः उप ब) गङ्गाम् उप स) गङ्गायाः समीपे द) उप गङ्गायाः

iv) <u>दुष्टा बुद्धि: यस्य स:</u> चौर्यकर्मणि निरत: आसीत् ।

अ) दुष्टबुद्धिस्य ब) दुष्टबुद्धिः स) दुष्टबुद्धेः द) दुष्टाबुद्धिम्

v) स: <u>दिवानिशम्</u> गीतापाठं करोति ।

अ) दिवा च निशा च अनयो: समाहारे ब) दिवा च निशम् च

स) दिवायां च निशायां च द) दिवे च निशे च

7. प्रकृति प्रत्ययौ संयोज्य विभज्य वा समुचितम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत - 6

i) बालाः मार्गे ( गम् + शतृ ) ........................... वानरं दृष्ट्वा हसन्ति ।

अ) गच्छन् ब) गच्छन्तम् स) गच्छतम् द) गच्छन्तः

ii) ( प्र + कम्प् + शानच् ) ...................... लताः सर्वदा शोभन्ते ।

अ) प्रकम्पमानः ब) प्रकम्पमानाः स) प्रकम्पमानेभ्यः द) प्रकम्पमानाभ्यः

iii) मूषकै: सह ( मूषक + टाप् ) .....................अपि इतस्ततः धावन्ति ।

अ) मूषकाः ब) मूषका स) मूषिकाः द) मूषिका

iv) दुर्योधनस्य <u>मूर्खतायाः</u> कारणात् कुरुक्षेत्र संग्रामः अभवत् ।

अ) मूर्ख + तल् ब) मूर्ख + शतृ स) मूर्ख + त्व द) मूर्खता + टाप्

v) विद्याया: <u>महत्त्वम्</u> सर्वे न जानन्ति ।

अ) महा + त्वम् ब) महता + व स) महत् + त्व द) महत् + शतृ

Vi ) बालकेन पाठा:---------- (पठ्+क्त) ।

अ) पठितः ब) पठिताः स) पठितवान् द) पठितवन्तः

8. प्रदत्तविकल्पेभ्यः उचितम् उपपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत - 3

1. -----हीना: जना: पशुसमाना: भवन्ति । क) धर्मेण ख) धर्मेषु ग) धर्म: घ) धर्माय

2. धिक् तम् ----------, य: अनुचितं कार्यं करोति।

क) पुरुषस्य ख) पुरुषम् ग) पुरुषाय घ) पुरुष:

3. धेनु: ----------स्निह्यति ।क) वत्स: ख) वत्साय ग) वत्से घ) वत्सेन

## भागः “घ”पठित-अवबोधनम् (अ-25)

9 .अधोलिखितम् गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।(५ )

**अस्ति मध्यदेशालङ्कारभूता मेखलेव भुवो विन्ध्याटवी नाम। तस्यां च पम्पाभिधानं पद्मसरः। तस्य पश्चिमे तीरे महाजीर्णः शाल्मलीवृक्षः। तस्यैवैकस्मिन् कोटरे निवसतः कथमपि पितुरहमेव सूनुरभवम्। ममैव जायमानस्य प्रसववेदनया जननी मे लोकान्तरमगमत्। तातस्तु सुतस्नेहादन्तर्निगृह्य शोकं मत्संवर्धनपर एवाभवत्। परनीडनिपतिताभ्यः शालिवल्लरीभ्यस्तण्डुलकणान् शुककुलावदलितानि च फलशकलानि समाहृत्य मह्यमदात्। मदुपभुक्तशेषमेवाकरोदशनम्।**

अ).एकपदेन उत्तरत- (१)

I)शाल्मलीवृक्षः कुत्र आसीत्?

II)शुकस्य जननी कुत्र अगमत् ?

आ)पूर्णवाक्येन उत्तरत- (२)

I)कोटरस्थः शुकः किम् अखादत् ?

इ)निर्देशानुसारम् उत्तरत- (२)

I)महाजीर्णः शाल्मलीवृक्षः- अत्र विशेषण पदम् किम् ?

II)ममैव जायमानस्य....अत्र "मम" पदं कस्मै प्रयुक्तम् ?

10.श्लोकं पठित्वा उत्तरत । (5)

**स्वाधीनताऽऽर्यभुवि मूर्तिमती समाना**
**राणाप्रताप-बलवीर्यविभासमाना।**
**आटीकते समुपमा नहि यां सुशोचिः**
**शाटीव सा जयति काचन हल्दिघाटी ॥1॥**

एकपदेन उत्तरत

अ) आर्यभुवि का मूर्तिमती समाना ?

आ) का नहि आटीकते ?

पूर्ण वाक्येन उत्तरत।

अ) आर्यभुवि स्वाधीनता कीदृशी आसीत् ?

यथानिर्देशम् उत्तरत ।

अ) काचन हल्दीघाटी -अत्र विशेष्यपदं किम् ?

आ)पृथीव्याम्-पदस्य पर्यायपदम् किम् ?

इ)साटीव सा जयति - "सा" पदं कस्मै प्रयुक्तम् ?

ई) आटीकते -क्रियापदस्य कर्तृपदम् किम् ?

11.नाट्यांशम् पठित्वा उत्तरत। (5)

- काञ्चुकीयः—परित्रायताम् परित्रायताम् -...............
- रामः- ............. येनाकार्यं करिष्यति।(प्रथमः अनुच्छेदः)

एकपदेन उत्तरत

अ)एकशरीर-संक्षिप्ता का रक्षितव्या ?

आ)शरीरे कः प्रहरति ?

पूर्ण वाक्येन उत्तरत।

अ)स्वजनशब्दः मे काम् उत्पादयिष्यति ?

यथानिर्देशम् उत्तरत ।

अ)कः परित्रातव्यः-अत्र विशेषणपदं किम् ?

आ)निवारणम्-पदस्य पर्यायपदम् किम् ?

इ)गुणः- पदस्य विलोम पदम् किम्?

ई) निश्चितरुपेण- इत्यर्थे किम् पदम् प्रयुक्तम् ?

12.भावार्थं मञ्जूषापदैः पूरयत । 3

**एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना।**
**आह्लादितं कुलं सर्वं यथा चन्द्रेण शर्वरी ॥8॥**

भावार्थः- एकेन अपि ...१.... विद्यासहितेन .......२...... सम्पूर्णः वंशः प्रसन्नः (भवति) येन प्रकारेण ...३....रात्रिः (प्रसन्ना भवति)।

मञ्जूषा- (चन्द्रमसा , सज्जनेन , सुतेन )

13.अन्वये रिक्तस्थानानि पुरयत । 3

**नीलेन पक्ष-निवहेन खमाहसन्तः**
**चञ्च्वा फलानि विमलानि समञ्चयन्तः।**
**'श्रीराम' नाम मधुरं मधुरं क्वणन्तः**
**अद्यापि यत्र सुशुका विलसन्ति सन्तः ॥6॥**

अन्वयः- नीलेन पक्ष-निवहने .....१......... विमलानि....२.......चञ्चवा समञ्चयन्तः यत्र अद्यापि "श्रीराम" नाम मधुरं मधुरं क्वणन्तः सुशुकाः ......३......विलसन्ति ।

14.वाक्यांशैः सह सार्थक मेलनम् कुरुत | 2

| क | ख |
|---|---|
| • शाटीव सा जयति | काञ्चनकाञ्चनीयाम् |
| • मातेव रोदिति सखे | मधुरम् क्वणन्तः |
| • श्रीराम नाम मधुरम् | काचन हल्दीघाटी |
| • शोभां दधात्युषसि | कुररी नु काचित् |

15.प्रसङ्गानुसारं सार्थकम् अर्थम् चित्वा लिखत । 2

- ततस्तयोरेवम् <u>अभूदालापः</u> ।

ई) वार्तालापः आ) कलहः इ)विवादः

- खद्योतपंङ्क्तिरमला <u>पिकालि-गीतिः।</u>

उ) कोकिलः आ) श्वानः इ)खगः

- कश्चन कापालिकः सभां समागतः ।

ऊ) सज्जनः आ) दुर्जनः इ) सन्यासी*

- शोभां दधाति <u>उषसि </u>काञ्चनकाञ्चनीयाम्।

ऋ) प्रातःकाले * आ) दिवसे इ)रात्रौ

(आ-10) संस्कृतसाहित्येतिहासस्य परिचयः

16.अधोलिखितानाम् कवीनाम् देशकालकृतीनाम् यथानिर्देशं नामानि लिखत ।(10)

i) भारविः

ii) भर्तृहरिः

iii) अम्बिकादत्तव्यासः

iv) कालिदासः

v) बोधायनः

vi) विशाखदत्तः

vii) विष्णुशर्मा

viii) भारविः

ix) भासः

देशः

कालः

कृतिः

x) मनुः

**अथवा**

उचितपदैः रिक्तस्थानानि पूरयत।

i) कालिदासेन---ग्रन्थाः विरचिताः,तेषु---नाटकम् सर्वोत्कृष्टम् ।

ii) भारविः ---लिखितवान् ।अत्र मुख्यरुपेण ---कथा वर्णिता ।

iii) मेघदूतम्----अस्ति , ----- च कथाग्रन्थः।

iv)नाटकस्य प्रारम्भे------ अन्ते च ------- ।

v) महाकाव्यस्य विभाजनम् ------ भवति , नाटकस्य च -------।

मञ्जूषा – (सर्गेषु, सप्त, अङ्केषु, नान्दी, खण्डकाव्यम्, पञ्चतन्त्रम्, अभिज्ञानशाकुन्तलम्, शिवपार्थयोः, किरातार्जुनीयम् , भरतवाक्यम् )

-------------------**************--------------------

**अभ्यास पत्रिका-२**

**केन्द्रीय -विद्यालय-संगठनम्**

**विषयः – संस्कृतम्(केन्द्रिकम्) SANSKRIT (CORE) (322)**

**कक्षा - द्वादशी (XII )** **समयः-होरात्रयम्** **पूर्णाङ्काः- 80**

.....................................................................

| |
|---|
| **अपठितावबोधनम् (क) -10** अङ्काः |
| रचनात्मककार्यम् **(ख) -15**अङ्काः |
| अनुप्रयुक्तव्याकरणम् **(ग) -20**अङ्काः |
| पठित**-**अवबोधनम् (घ) _**25**अङ्क |
| संस्कृतसाहित्येतिहासस्य परिचयः -10 |

निर्देशाः –

.1अस्मिन् प्रश्नपत्रे चत्वारःखण्डाःसन्ति।

.2सर्वे प्रश्नाःअनिवार्याः।

.3प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि ।

.4प्रश्नसंख्या अवश्यं लेखनीया।

.5उत्तराणि संस्कृते एव लेखनीयानि

.....................................................................

**(‘क’ खण्ड: अपठित-अवबोधनम् =10 अङ्का)**

1.अधोलिखितम् अनुच्छेदं पठित्वा प्रश्ननाम् उत्तराणि लिखत- 10

महर्षे: भरद्वाजस्य पुत्र: द्रोणाचार्य: आसीत् । पाञ्चाल-नरेशस्य पुत्र: द्रुपद: आसीत् । द्रोणाचर्य: द्रुपदश्च भरद्वाजस्य आश्रमे मिलित्वा अपठताम् । तयो: गभीरा मित्रता अभवत् । कदाचन द्रुपद: अवदत्- “ यदा स: राजा भविष्यति तदा द्रोणस्य कृते अर्द्धं राज्यं दास्यति ।” इति । शिक्षासमाप्ते: अनन्तरं द्रोण: कृपाचार्यस्य भगिनीं विवाहं अकरोत् । द्रोणस्य एक: पुत्र: अभवत् । तस्य नाम अश्वत्थामा आसीत् । स: स्वपुत्रं पत्नीम् च अधिकम् स्नेहम् अकरोत् ।

I.एकपदेन उत्तरत – (1X2=2)

(क) महर्षे: भरद्वाजस्य पुत्र: क: आसीत्?

(ख) द्रोण: कां विवाहं अकरोत् ?

II.पूर्णवाक्येन उत्तरत- 2X2=4

(क) पाञ्चाल-नरेशस्य पुत्र: क: आसीत्?

(ख) क: स्वपुत्रं पत्नीम् च अधिकम् स्नेहम् अकरोत् ?

III.निर्देशानुसारम् उत्तरत - 1X3=3

(क) गभीरा मित्रता इति पदयो: विशेष्यपदं किम् ?

(ख) स: स्वपुत्रं पत्नीम् च अधिकम् स्नेहम् अकरोत् । इति वाक्ये कर्त्तृपदं किम् ?

(ग) मित्रता इति पदस्य पर्यायपदं किम् ?

(घ) अस्य अनुच्छेदस्य कृते उपयुक्तशीर्षकं लिखत । 1

**( ‘ख’खण्ड: रचनात्मक-कार्यम् = 15 अङ्का: )**

2. विद्यालयात् दिनद्वयावकाशार्थं प्रार्थनापत्रं दातुं भवान् मोहन: इच्छति । एतदर्थं मञ्जूषाया: समुचितै: पदै: रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकासु पुन: लिखत - (1/2X10=5)

सेवायाम् ,

श्रीमन् मुख्याध्यापक (i)________

सरस्वती विद्यानिकेतनम्

(ii)_________

मान्यवरा: ,

सविनयम् निवेद्यते यत् (iii)________ मासस्य पञ्चमे दिनाङ्के मम भ्रातु: विवाह:(iv)_______ सम्पत्स्यते। विवाहतिथे: एकदिन-पूर्वमेव मया तत्र प्राप्तव्यम्। अत: (v)_______ अवकाशं प्रदाय(vi)_______ भवान् इति मदीया (vii)________ ।


दिनाङ्क:__________ (viii)_______ शिष्य: ,

(ix)_______

कक्षा(x) ________

| |
|---|
| आगामी , दिल्ली नगरे , महोदय , अनुगृह्णातु , मोहन: , प्रार्थना , दशमी,दिनद्वयस्य , भवदीय: ,कर्णपुरम् |

3. अधोदत्तं चित्रं दृष्ट्वा मञ्जूषाप्रदत्तपदै: पञ्च वाक्यानि रचयत- (1X5=5)



| |
|---|
| भोजनालय: , भोजनम् ,पाचक: , पचति , रोटिका: ,जलम् , ददाति ,खादन्ति , महिला , नयति ,जलपात्रम् , अन्नम् , जना: , उपविश्य , परिवेषकौ , परिवेषयत: , पात्राणि |

4. अधोलिखितै: मञ्जूषादत्तपदै: रिक्तस्थानानि पुरयित्वा कथां पुन: लिखत -(1/2X10=5(

राज्ञ: भोजस्य दर्शनाय स: कलिङ्गदेशम् (i) _______ मासं यावत् तत्र न्यवसत्। परं स: राजानं नापश्यत्। तस्य (ii)________ अपि परिसमाप्तम्। (iii)_______ नृप: (iv) _______बहिर्निर्गत:। तदा कवि: राजानं (v)________ अकथयत् – श्रीभोजराजं पश्यन्नेव तत्क्षणं रिपो: शस्त्रम् , कवे: कष्टं , मृगीदृशां नीवीबन्ध: च भूमौ (vi)_______ । तच्छ्रुत्वा राजा कवये (vii)________ ददौ। यदा राजा मृगयासक्त: आसीत् तदा कश्चित् व्याधसुत: एकं गीतम् अगायत्। गीतस्य (viii)_______ प्रसन्नो भूत्वा राजा (ix) _______ पञ्चलक्षं (x)________ ।

| |
|---|
| मृगयाभावेन , पाथेयम् , दृष्ट्वा , माधुर्येण , गायकाय , लक्षं , अददात् , पतन्ति , उपेत्य , एकदा |

**(‘ ग’खण्ड: अनुप्रयुक्त-व्याकरणम् = 20 अङ्का)**

5. रेखाङ्कितानाम् पदानां सन्धिं विच्छेदं वा लिखत- (1X6=6)

(i) स्व + अध्यायात् =................................ |

(ii) सत्यान्न = .........................+..................... |

(iii) स्वाध्यायात् + मा = .............................. |

(iv) वेद + उपनिषद् = .................................... |

(v) सेतुः + येन = ....................................... |

(vi) रक्ष + इति = ..................................... |

6. निम्नलिखितानां पदानां समासविग्रह: समासो वा कृत्वा लिखत – (1X5=5)

(i) न कालः =.................................. |

(ii) वसुधायाः अधिपः =...................... |

(iii) आदित्येन सह = ......................... |

(iv) न स्निग्धः = ............................ |

(v) स्वर्गाय तर्षः=.............................. |

7. प्रकृतिप्रत्ययौ संयोज्य विभज्य वा लिखत- (1X6=6)

(i) जीव + शतृ =................................

(ii) हन् + तव्यत् =...............................

(iii) मन् + क्त्वा = ..............................

(iv) आ + दिश् + क्त =.......................

(v) नि + शम् + ल्यप् = .....................

(vi)प्रियतमा = ……….+,,,,,,,,,,,,,,,,

9. कोष्ठकेभ्य: उचितपदानि चित्वा रिक्तस्थानेषु लिखत- (1/2X6 =3)

(i) द्वितीय: भाग: _______ अन्त: अस्ति । (जलात्, जलस्य, जलेन)

(ii) _______ परित: वृक्षा: सन्ति। ( विद्यालयम् , विद्यालयस्य , विद्यालये )

(iii) _______ बालकौ खादत:। (द्वे , द्वौ , द्वयम् )

(iv) _______ नम: । (सीताये, सीतायै, सीताम् )

(v) तस्मिन् ग्राम _______ जना: सन्ति। (बहव: बहु , बह्वा:)

(vi) माता ------स्निह्यति। ( पुत्रम् , पुत्रे , पुत्राय )

## (‘घ’ खण्ड: पठित-अवबोधनम् = 35 अङ्का: )

11. अधोलिखितम् गद्यांशं पठित्वा प्रश्ननाम् उत्तराणि लिखत-

सत्यं वद |धर्मं चर|स्वाध्यायान्मा प्रमदः सत्यान्न |आचार्याय प्रियं धनमाहृत्य प्रजातन्तु मा व्यवच्छेत्सीः| |प्रमदितव्यम् धार्मान्न प्रमदितव्यम् |स्वाध्याय प्रवचनाभ्यां न प्रमदितव्यम्|कुशलान्न प्रमदितव्यम्|

I.एकपदेन उत्तरत – (1/2X2=1)

(i) कस्मान्न प्रमदितव्यम् ?

(ii) कस्मात् मा प्रमदः?

II.पूर्णवाक्येन उत्तरत –

(i) आचार्याय किम् आहृत्य मा व्यवच्छेत्सीः? (2)

III.निर्देशानुसारम् उत्तरत – (1X2=2)

(i) प्रियं धनम् इति अनयो: पदयो: विशेष्यं किम्?

(ii) अत्र सत्यं इति पदस्य विलोमपदं किं ?

12. अधोलिखितं पद्यं पठित्वा प्रश्नानाम् उत्तराणि लिखत -

गुणी गुणं वेत्ति न वेत्ति निर्गुणः
बली बलं वेत्ति नवेत्ति निर्वल: |
पिको वसन्तस्य गुणं न वायसः
करी च सिंहस्य बलं न मूषकः ||

I.एकपदेन उत्तरत –

(i) वसन्तस्य गुणं कः जानाति ?

(ii) सिंहस्य बलं कः जानाति ?

II.पूर्णवाक्येन उत्तरत-

(i) गुणं बलं कः कः वेत्ति ?

III.निर्देशानुसारम् उत्तरत -

(i) अत्र गुणं इति पदस्य विलोमपदं किं ?

(ii) अत्र करी इति पदस्य कोऽर्थः

13. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-

सन्यासी – तत् किं कोऽपि न प्रविशति रात्रौ ?

दौवारिकः – (साक्षेपं ) कोऽपि कथं न प्रविशति ? परिचिता वा , प्राप्तपरिचयपत्रा वा , आहूता वा प्रविशन्ति , न तु ये केऽपि समागता भवादृशाः |

सन्यासी -: दौवारिक ! इत आयाहि किमपि कर्णे कथयिष्यामि |

दौवारिकः - (तथा कृत्वा ) कथ्यताम् |

सन्यासी -: यदि त्वम् मां प्रविशन्तं न प्रतिरुन्धेः तदधुनैव परिष्कृतपारदभस्म तुभ्यं दद्याम् यथा त्वम् गुञ्जामात्रेणापि द्वापञ्चाशत्संख्याकतुलापरिमितं ताम्रं सुवर्णं विधातुं शक्नुयाः |

I.एकपदेन उत्तरत (½X2=1)

(i) कः कर्णे कथयिष्यामि इति वदति ?

(ii) सन्यासी दौवारीकम् किं दातुम् इच्छति ?

II.पूर्णवाक्येन उत्तरत- (2)

(i) कः रात्रौ प्रविशति ?

III.निर्देशानुसारम् उत्तरत – (1X2=2)

(i) इत आयाहि किमपि कर्णे कथयिष्यामि । इति वाक्ये क्रियापदं किम्

(ii) कृत्वा इति पदे प्रत्यय: क: ? ( क्त , क्तवतु, क्त्वा )

14. अधोलिखितानां स्वभाषया भावार्थं लिखत ( 1X3=3)

(क) यदि न सहसे राज्ञो मोहं धनुः स्पृश मा दयाम् ।

(ख) यत्कृते महति क्लेशे राज्ये मे न मनोरथः ।

(ग) नवनृपतिविमर्शे नास्ति शङ्का प्रजानाम् ।

15. उचितपदैः सह रिक्तस्थानानि पूरयत |  (1X3=3)

(क) एकेनापि ................ साधुना सुपुत्रेण ............. सर्वं आह्लादितं यथा ............ शर्वरी ।

(ख) ये ............. दासाः ते सर्वलोकस्य ........... भवन्ति । येषां आशा ..........(भवति ) तेषां .......

16. कः केन विभाति लिखतु |  (1/2 X4=2)

| | | |
|---|---|---|
| (क) | गुणी | चन्द्रेण |
| (ख) | शर्वरी | गुणेन |
| (ग) | सिंह | विद्यया |
| (घ) | विद्वान् | बलेन |

16. हल्दीघाटी युद्धस्य ऐतिहासिकः परिचयः हिन्दी /संस्कृतभाषया लिखतु |  (2)

17.प्रश्नानाम् उत्तराणि लिखत –  (1X10=10)

(i) शङ्कराचार्य: भारतस्य कस्मिन् राज्ये जन्म अलभत ?

(ii) शिवराजविजय: इति गद्यकाव्यं क: अरचयत् ?

(iii) रामायणस्य प्रथमकाण्डस्य नाम किम् ?

(iv) क: मालविकाग्निमित्रम् रचितवान् ?

(v) दशकुमारचरितं क: रचितवान् ?

(vi) उत्तररामचरितं नाटकम् क: अरचयत् ?

(vii) वैराग्यशतकं क: अलिखत् ?

(viii) माघ: किं नाम काव्यम् अरचयत् ?

(ix) कौटिल्य: किं रचितवान् ?

(x) करुणरसप्रधानं नाटकं किम् अस्ति ?

************************इति शम्*************************

SET – 4

**Series : BVM/1**

कोड नं.
Code No. **22**

**रोल नं.**
**Roll No.**

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **18** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जायेगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **15** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **18** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019 PARIKSHA 2019

# संस्कृतम् (केन्द्रिकम्)

## SANSKRIT (Core)

*समय : होरात्रयम्* *पूर्णाङ्का: : **100***
*निर्धारित समय : 3 घंटे* *अधिकतम अंक : **100***
*Time allowed : **3** hours* *Maximum Marks : **100***

**निर्देशा :**

*सङ्केताभावे सर्वेषां प्रश्नानामुत्तराणि, संस्कृतेनैव लेखनीयानि ।*

*जहाँ स्पष्ट संकेत नहीं हैं, वहाँ उत्तर संस्कृत में ही दीजिए ।*

*Answer the questions in Sanskrit only unless stated otherwise.*

*अस्मिन् प्रश्नपत्रे* **चत्वार:** *खण्डा: सन्ति ।*

*इस प्रश्न-पत्र में* **चार** *खण्ड हैं ।*

*There are* ***four*** *sections in this question paper.*

| | | | |
|---|---|---|---|
| खण्डः क | : | अपठितांशावबोधनम् (अपठितांश – अवबोधन ) | **10 अङ्काः** |
| SECTION A | : | (Unseen Reading Comprehension) | |
| खण्डः ख | : | संस्कृतेन रचनात्मककार्यम् (संस्कृत रचनात्मक कार्य) | **15 अङ्काः** |
| SECTION B | : | (Sanskrit Writing Skills) | |
| खण्डः ग | : | अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण) | **30 अङ्काः** |
| SECTION C | : | (Applied Grammar) | |
| खण्डः घ | : | भाग I – पठितांशावबोधनम् (पठितांश – अवबोधन) | **35 अङ्काः** |
| SECTION D | : | PART I – Reading Comprehension | |
| | | भाग II – सामान्यः संस्कृतसाहित्यपरिचयः (सामान्य संस्कृत साहित्य परिचय) | **10 अङ्काः** |
| | | PART II – General Introduction to Sanskrit Literature | |

## खण्डः क (SECTION A) **10 अङ्काः**

## अपठितांशावबोधनम्

## अपठितांश – अवबोधन

## Unseen Reading Comprehension

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।

निम्नलिखित गद्यांश को पढ़कर दिये गये प्रश्नों के उत्तर संस्कृत में लिखिए ।

Read the following passage and answer the given questions in Sanskrit.

**गद्यांशः :**

अस्माकं जीवने पदे पदे प्रत्येकं कार्येषु विज्ञानं व्याप्तमस्ति । विज्ञानस्य चमत्कारान् दृष्ट्वा वयम् आश्चर्यं कुर्मः । सर्वेषु क्षेत्रेषु एव विज्ञानस्य लाभाः दृश्यन्ते । अद्य वयं वाष्पयानेन देशदेशान्तरेषु परिभ्रमामः । पोतेन अनायासं नदीः समुद्रांश्च तरामः । विमानेन आकाशे स्वच्छन्दं विहरामः । अद्य तु राकेट इति यन्त्रेण तु चन्द्रमसि अपि भ्रमणाय प्रयत्नं कुर्मः । मोटर-बस-कार-स्कूटरादिभिः विविधैः यानैः तु वयं प्रतिदिनं प्रतिपलं च गमनागमनं कुर्मः । अद्य अस्माकं जीवने विद्युतः उपयोगं तु सर्वत्र दृश्यते । रात्रीणां अन्धकारे विद्युद्दीपकं प्रज्वाल्य सर्वत्र प्रकाशं कुर्मः । विद्युतः प्रभावेण व्यजनानि चलन्ति, रोमाञ्चकारिणि दारूणेऽपि शिशिरे शैत्यभयं न भवति । एवमेव ग्रीष्मतापोऽपि न अनुभूयते । उद्योगक्षेत्रेषु विद्युतः शक्त्या मुद्रणयन्त्राणि, अनेकानि यन्त्रोपकरणानि चलन्ति । तैः नवीनानि वस्तूनि निर्मीयन्ते ।

प्रश्नाः

(अ) एकपदेन उत्तरत । (केवलं प्रश्न**चतुष्टयम्**) ½ × 4 = 2

एक शब्द में उत्तर दीजिए । (केवल **चार** प्रश्न)

Answer in one word of any f**our** questions :

(i) अस्माकं जीवने पदे पदे किं व्याप्तम् ?

(ii) विज्ञानस्य कान् दृष्ट्वा वयम् आश्चर्यं कुर्मः ?

(iii) वयं देशदेशान्तरेषु केन परिभ्रमामः ?

(iv) वयं केन समुद्रान् तरामः ?

(v) केन आकाशे स्वच्छन्दं विहरामः ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्न**द्वयम्**) 2 × 2 = 4

पूर्णवाक्य में उत्तर दीजिए : (केवल **दो** प्रश्न)

Answer in a complete sentence of any **two** questions :

(i) वयं रात्रीणाम् अन्धकारे कथं सर्वत्र प्रकाशं कुर्मः ?

(ii) वयम् चन्द्रमसि केन गन्तुं शक्नुमः ?

(iii) उद्योगक्षेत्रेषु विद्युतः शक्त्या किं किं भवति ?

(इ) यथानिर्देशम् उत्तरत – (केवलं प्रश्न**चतुष्टयम्**) : ½ × 4 = 2

निर्देशानुसार उत्तर दीजिए : (केवल **चार** प्रश्न)

Answer as directed of any **four** questions :

(i) 'सर्वेषु' इति पदस्य विशेष्यपदं किं प्रयुक्तम् ?

(ii) 'गगने' इति पदस्य अत्र किं पर्यायपदं प्रयुक्तम् ?

(iii) 'गमनम्' इत्यस्य अत्र किं विलोमपदं प्रयुक्तम् ?

(iv) 'परिभ्रमामः' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

(v) तैः नवीनानि वस्तूनि निर्मीयन्ते इति वाक्ये 'तैः' इति सर्वनामपदं केभ्यः प्रयुक्तम् ?

(ई) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत । 2

इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।

Write a suitable title for this passage in Sanskri At.

## खण्ड: ख (SECTION B) **15 अङ्का:**

### संस्कृतेन रचनात्मककार्यम्

### संस्कृत रचनात्मक कार्य

### Sanskrit Writing Skills

2. रुग्णतायाः कारणात् अवकाशप्राप्त्यर्थं प्रधानाचार्यं प्रति लिखिते प्रार्थनापत्रे मञ्जूषायां प्रदत्तशब्दैः रिक्तस्थानानि पूरयत । **½ × 10 = 5**

बीमारी के कारण अवकाश लेने के लिए प्रधानाचार्य को लिखे गए प्रार्थनापत्र में मञ्जूषा में दिये शब्दों से रिक्त स्थानों की पूर्ति कीजिए ।

Fill in the blanks with the words from the given box, regarding an application for sick leave to the Principal.

सेवायाम्,

__(i)__,

राजकीय सर्वोदय विद्यालयः

दिल्ली ।

विषयः – अवकाशप्रदानाय प्रार्थनापत्रम् ।

__(ii)__,

सविनयं निवेदनम् अस्ति यद् अहम् विगत, रात्रेः एव __(iii)__ पीडितः अस्मि । येनाहम् __(iv)__ विद्यालयम् आगन्तुम् __(v)__ अस्मि । कृपया द्विदिवसपर्यन्तम् __(vi)__ अवकाशम् __(vii)__ माम् __(viii)__ भवन्तः । अहं भवताम् __(ix)__ भविष्यामि ।

सधन्यवादः,

भवदीयः __(x)__

अरुणः

कक्षा द्वादशी 'अ'

क्रमाङ्कः 16

**मञ्जूषा**

| |
|---|
| तीव्रज्वरेण, मान्याः, अध्ययनाय, प्रधानाचार्य महोदयाः, असमर्थः, शिष्यः, अनुगृह्णन्तु, कृतज्ञः, प्रदाय, मह्यम् |

3. मञ्जूषायां प्रदत्तशब्दानां सहायतया अधोलिखितायां लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुनः लिखत ।

**½ × 10 = 5**

मंजूषा में दिये गये शब्दों की सहायता से निम्नलिखित लघुकथा में रिक्त स्थानों की पूर्ति कर कथा को पुनः लिखिए ।

Fill in the blanks of the following short story with the help of the words given in the box below and rewrite the same :

**कथा** :

आसीत् गोदावरीतीरे विशालः ___(i)___ । तत्र विविधाः पक्षिणः ___(ii)___ निवसन्ति स्म । एकदा कश्चन ___(iii)___ तत्र आगत्य ___(iv)___ तण्डुलकणान् ___(v)___ जालम् प्रासारयत् स्वयं च ___(vi)___ भूत्वा कपोतानाम् ___(vii)___ कृतवान् । अत्रान्तरे चित्रग्रीवनामा कश्चन कपोतराजः ___(viii)___ तत्र आगतः । तत्र प्रकीर्णान् ___(ix)___ दृष्ट्वा सः सविस्मयं चिन्तितवान् यत् निर्जने वने तण्डुलानां प्रकीर्णनं ___(x)___ कृतम् भवेत् ? अवश्यमेव किमपि रहस्यमेव ।

**मञ्जूषा**

| |
|---|
| केन, रात्रौ, शाल्मलीवृक्षः, सपरिवारः, व्याधः, बहून्, प्रतीक्षाम्, तण्डुलकणान्, विकीर्य, प्रच्छन्नः । |

4. 'परोपकारः' **अथवा** 'मम वाटिका' इति विषयमधिकृत्य मञ्जूषायां प्रदत्तशब्दानां साहाय्येन **पञ्चसंस्कृतवाक्यैः** एकम् अनुच्छेदं लिखत । **1 × 5 = 5**

मञ्जूषा में दिये गये शब्दों की सहायता से 'परोपकार' **अथवा** 'मम वाटिका' इस विषय पर **पाँच** संस्कृत वाक्यों में एक अनुच्छेद लिखिए ।

With the help of the words given in the box below describe 'Paropkar' **or** 'Mam Vatika' in **five** sentences in Sanskrit.

**मञ्जूषा**

| |
|---|
| परोपकारः, नद्यः, वृक्षाः, मेघाः, शरीरम्, वहन्ति, फलन्ति, वर्षन्ति, परोपकाराय, सज्जनाः, प्रकृतिः, अपि, सदा |

**अथवा/OR**

| |
|---|
| वाटिकायाः, स्थानम्, वृक्षाः, लताः, पादपाः, भ्रमामि, सौन्दर्यम्, मालाकारः, पुष्पाणि, शोभन्ते, वृक्षपंक्तिः, पक्षिणः |

## खण्डः ग (SECTION C) 30 अङ्काः

### अनुप्रयुक्तव्याकरणम्

### अनुप्रयुक्त व्याकरण

### Applied Grammar

5. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिविच्छेदं कुरुत – (केवलं प्रश्न**षट्कम्**) **1 × 6 = 6**

निम्नलिखित वाक्यों में रेखांकित पदों का सन्धिविच्छेद कीजिए : (केवल **छः** प्रश्नः)

Disjoin Sandhi's in the underlined words of the following sentences. (Only **six** questions)

(i) अस्त्यस्माकं गेहे कोऽपि प्रातराशः ।

(ii) तदुपविशतु आर्यः ।

(iii) हितान्न यः संशृणुते स किं प्रभुः ?

(iv) प्राचीनश्च एषः श्वेतस्तूपः ।

(v) अथ प्रतिषिद्धः कौमुदी–महोत्सवः ।

(vi) प्रासादोऽपि अत्रैव वर्तते ।

(vii) उत्तरं दक्षिणं चायनम् ।

6. निम्नलिखितवाक्येषु रेखाङ्कितसमस्तपदानां विग्रहं कुरुत । (केवलं प्रश्न**षट्कम्**) **1 × 6 = 6**

निम्नलिखित वाक्यों में रेखांकित समस्त पदों के विग्रह कीजिए । (केवल **छः** प्रश्न)

Expound the underlined words of the following sentences. (any **six** questions)

(i) अनेनैव कृताः कल्पभेदाः ।

(ii) सदयम् हृदयम् भाति ।

(iii) दुराराध्या राजलक्ष्मीः ।

(iv) सुमहिमा यद्यस्ति किम् ।

(v) व्रजन्ति ते मूढधियः पराभवम् ।

(vi) सर्वे यथास्थानम् उपविशन्ति ।

(vii) अयमेव अहोरात्रम् जनयति ।

7. अधोलिखितवाक्येषु कोष्ठकान्तर्गतं प्रकृतिं प्रत्ययं च योजयित्वा रिक्तस्थानानि पूरयत । (केवलं प्रश्ना**ष्टकम्**) **1 × 8 = 8**

निम्नलिखित वाक्यों में कोष्ठक के अन्तर्गत दी गई प्रकृति के साथ निर्दिष्ट प्रत्यय को जोड़कर रिक्त स्थानों की पूर्ति कीजिए । (कोई **आठ** प्रश्न)

Fill in the blanks in the following sentences by adding suffixes to the roots and words given in the brackets of any **eight** questions.

(i) अरुणः प्रकाशः पूर्वस्यां _______ मरीचिमालिनः । (भग + मतुप्)

(ii) आर्यं शिरसा _______ विज्ञापयति । (प्र + नम् + ल्यप्)

(iii) _______ यद्यस्ति किं पातकैः । (पिशुन + तल्)

(iv) _______ च न परिभ्रष्टम् । (सत् + त्व)

(v) _______ अयम् दरिद्रभावः । (रम् + अनीयर्)

(vi) अभियानम् _______ आसीत् । (साहस + ठक्)

(vii) येषाम् अन्यत्र अपि _______ गतिः वर्तते । (विद् + शानच्)

(viii) केन इदं _______ ? (कथ् + क्त)

(ix) अहम् कौमुदीमहोत्सवस्य प्रयोजनं _______ इच्छामि । (श्रु + तुमुन्)

8. अधोलिखितवाक्येषु कर्तृक्रियापदयोः अन्वितिं कुरुत । **1 × 5 = 5**

निम्नलिखित वाक्यों में कर्ता एवं क्रियापदों की अन्विति कीजिए ।

Write the suitable verbs according to the subject in the following sentences.

(i) नेपथ्ये वैतालिकौ काव्यपाठं _______। (कुर्वन्ति/कुरुतः)

(ii) मत्स्यजीविनः समागत्य मत्स्यसंक्षयं _______ । (करिष्यतः/करिष्यन्ति)

(iii) मठानां विशालता भव्यता च प्रेक्षकान् प्रसभम्_________ ।(आकर्षन्ति/आकर्षतः)

(iv) अयमेव अहोरात्रं _______ (जनयति/जनयतः)

(v) चतुर्भिः पुरुषः _______ । (परीक्ष्यते/परीक्ष्यन्ते)

**अथवा/OR**

अधोलिखितवाक्येषु विशेष्यैः सह मञ्जूषायाः विशेषणपदानि योजयत ।

निम्नलिखित वाक्यों में विशेष्यों के साथ मञ्जूषा से विशेषण पदों को जोड़िए ।

Add the appropriate adjectives from the box with their qualifying nouns in the following sentences.

(i) एवं ______ भोजनानां दात्री भव ।

(ii) ग्रीष्मे ______ भूमिः धूसरवर्णा जायते ।

(iii) अयमेव वत्सरं ______ भागेषु विभनक्ति ।

(iv) समिद्भिः ______ छदिप्रान्तः ।

(v) सत्येन पन्था विततो ______ ।

**मञ्जूषा**

| |
|---|
| अतिनमितः, देवयानः, शोभनानां, द्वादशसु, नीलवर्णा |

9. अधोलिखितेषु वाक्येषु कोष्ठकपदैः सह उपयुक्तविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत । (केवलं प्रश्नपञ्चकम्)

**1 × 5 = 5**

निम्नलिखित वाक्यों में कोष्ठक में दिये गये शब्दों में उपयुक्त विभक्ति का प्रयोग कर रिक्त स्थानों की पूर्ति कीजिए । (केवल **पाँच** प्रश्न)

Fill in the blanks using appropriate case-endings with the words given in the brackets in the following sentences : (Only **five** sentences)

(i) तत् अलं भवतः __________ । (सन्ताप)

(ii) _______ (सर्व) नमो नमः ।

(iii) स स्तम्भः ________ (विकृति) विना तथैव तिष्ठति ।

(iv) अस्माकं प्राचार्यः _________ (छात्र) पारितोषिकं दास्यति ।

(v) सुखं हि ________ अनुभूय शोभते । (दुःख)

(vi) अनागतविधाता प्रत्युत्पन्नमतिश्च निष्क्रान्तौ ________ सह । (परिजन)

## खण्डः घ (SECTION D) — 35 अङ्काः

### भाग – I

### PART – I

### पठितांशावबोधनम्

### पठितांश – अवबोधन

### Reading Comprehension

10. अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत । **5**

निम्नलिखित गद्यांश को पढ़कर उन पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following prose passages and answer the questions based on them in Sanskrit.

**गद्यांशः**

तेषां तत् कुलिशपातोपमं वचः समाकर्ण्य अनागतविधाता सर्वान् मत्स्यान् आहूय इदम् अवदत् – अहो ! श्रुतं भवद्भिः यत् मत्स्यजीविभिः अभिहितम् ? तद् रात्रावपि गम्यतां किञ्चित् निकटं सरः । उक्तं च –

अशक्तैर्बलिनः शत्रोः कर्तव्यं प्रपलायनम् ।

आश्रितव्योऽथवा दुर्गः नान्या तेषां गतिर्भवेत् ।।

**प्रश्नाः**

(I) एकपदेन उत्तरत । **½ × 2 = 1**

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) कः सर्वान् मत्स्यान् आहूय अवदत् ?

(ii) बलिनः शत्रोः अशक्तैः किं कर्तव्यम् ?

(II) पूर्णवाक्येन उत्तरत – (केवलं प्रश्न**मेकम्**) **2 × 1 = 2**

पूर्ण वाक्य में उत्तर दीजिए । (केवल **एक** प्रश्न)

Answer in a complete sentence of any **one** question.

(i) मत्स्यजीविनां वचः कीदृशम् आसीत् ?

(ii) अनागतविधाता मत्स्यान् रात्रौ अपि आत्मरक्षार्थं कुत्र गन्तुम् अकथयत् ?

(III) यथानिर्देशम् उत्तरत । (केवलं प्रश्न**चतुष्टयम्**)

निर्देशानुसार उत्तर दीजिए । (केवल **चार** प्रश्न)

Answer as directed of any **four** questions.

(i) 'वचः' इत्यस्य विशेषणपदं किं प्रयुक्तम् ? **½ × 4 = 2**

(ii) 'शक्तैः' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

(iii) 'अवदत्' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

(iv) 'तडागः' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

(v) 'भवद्भिः' इति सर्वनामपदं केभ्यः प्रयुक्तम् ?

11. अधोलिखितं पद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत । **5**

निम्नलिखित पद्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following verse and answer the questions based on them in Sanskrit.

**पद्यम्**

स किंसखा साधु न शास्ति योऽधिपम्, हितान्न यः संशृणुते स किंप्रभुः ।
सदानुकूलेषु हि कुर्वते रतिम्, नृपेष्वमात्येषु च सर्वसम्पदः ।।

**प्रश्ना** :

(I) एकपदेन उत्तरत । **½ × 2 = 1**

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) यः अधिपं साधु न शास्ति स किम् उच्यते ?

(ii) सदानुकूलता केषु भवेत् ?

(II) पूर्णवाक्येन उत्तरत । (प्रश्न**मेकम्**) **2 × 1 = 2**

पूर्णवाक्य में उत्तर दीजिए । (**एक** प्रश्न)

Answer in a complete sentence of any **one** question.

(i) किंप्रभुः कः भवति ?

(ii) यत्र राजा मन्त्रिणः च परस्परं सहयोगिनः भवन्ति, तत्र राज्ये काः निवसन्ति ?

(III) यथानिर्देशम् उत्तरत । (केवलं प्रश्न**चतुष्टयम्**) **½ × 4 = 2**

निर्देशानुसार उत्तर दीजिए । (कोई **चार** प्रश्न)

Answer as directed of any **four** questions.

(i) 'नृपेष्वमात्येषु' इत्यस्य विशेषणं किम् ?

(ii) 'दुष्टः राजा' इत्यर्थे किं पदम् अत्र प्रयुक्तम् ?

(iii) 'कुर्वते' इत्यस्य कर्तृपदं किम् ?

(iv) 'प्रतिकूलेषु' इति पदस्य विलोमपदम् किं प्रयुक्तम् ?

(v) 'राजानम्' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

12. अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशम् उत्तरत । **5**

निम्नलिखित नाट्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following drama passage and answer the questions based on them in Sanskrit.

**नाट्यांशः :**

राजा – आर्य वैहीनरे ! आभ्यां वैतालिकाभ्यां सुवर्णशतसहस्रं दापय ।

चाणक्यः – (सक्रोधम्) वैहीनरे ! तिष्ठ, तिष्ठ । न गन्तव्यम् । वृषल ! किम् अस्थाने महान् प्रजा – धनापव्ययः ?

राजा – (सक्रोधम्) आर्येण एव सर्वत्र निरुद्धचेष्टस्य मे बन्धनम् इव राज्यम्, न राज्यम् इव ।

चाणक्यः – वृषल ! स्वयम् अनभियुक्तानाम् राज्ञाम् एते दोषाः सम्भवन्ति ।

राजा – यद्येवं तर्हि कौमुदीमहोत्सव – प्रतिषेधस्य तावत् प्रयोजनम् श्रोतुम् इच्छामि ।

चाणक्यः – कौमुदी-महोत्सवस्य आयोजनस्य प्रयोजनम् ज्ञातुम् इच्छामि ।

राजा – प्रथमं मम आज्ञायाः पालनम् ।

**प्रश्नाः**

(I) एकपदेन उत्तरत । **½ × 2 = 1**

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) चाणक्यः राज्ञे कस्य सम्बोधनस्य प्रयोगं करोति ?

(ii) राजा कस्य प्रतिषेधस्य प्रयोजनं श्रोतुम् इच्छति ?

(II) पूर्णवाक्येन उत्तरत । (केवलं प्रश्न**मेकम्**) **2 × 1 = 2**

पूर्ण वाक्य में उत्तर दीजिए । (केवल **एक** प्रश्न)

Answer in a complete sentence of any **one** question.

(i) राजा वैतालिकाभ्याम् किम् दापयितुम् इच्छति ?

(ii) नाट्यांशेऽस्मिन् कस्य प्रथमम् आज्ञापालनम् कथितम् कस्य च आज्ञाया उल्लंघनं कथितम् ?

(III) यथानिर्देशम् उत्तरत । (केवलं प्रश्नचतुष्टयम्) ½ × **4** = **2**

निर्देशानुसार उत्तर दीजिए । (कोई **चार** प्रश्न)

Answer as directed of any **four** questions.

(i) प्रजाधनापव्ययः इत्यस्य विशेषणपदम् किम् ?

(ii) अनभियुक्तानां 'राज्ञाम् दोषाः सम्भवन्ति' इत्यत्र कर्तृपदम् किम् अस्ति ?

(iii) 'गुणाः' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

(iv) 'मम आज्ञायाः पालनम्' अत्र 'मम' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(v) 'अन्यत्' इत्यस्य समानार्थकं पदं किं प्रयुक्तम् ?

13. यथानिर्देशम् उत्तरत । **2** × **2** = **4**

निर्देशानुसार उत्तर दीजिए ।

Answer as directed.

(i) "विभवानुवशा भार्या समदुःखसमो महान् ।"

अस्य श्लोकांशस्य सन्दर्भग्रन्थः कः ? तस्य लेखकः च कः इति लिखत ।

(ii) "देव ! कः अन्यः जीवितुकामो देवस्य शासनम् अतिवर्तेत ?"

इदं वाक्यं कः कं प्रति कथयति ?

**अथवा/OR**

(i) "हितान्न यः संश्रृणुते स किं प्रभुः ।"

इति श्लोकांशः कस्मात् ग्रन्थात् संग्रहीतः ? कश्च अस्य लेखकः ?

(ii) "प्रयोजनमन्तरा चाणक्यः स्वप्नेऽपि न चेष्टते"

इति वाक्यं कः कं प्रति कथयति ?

14. प्रत्येकम् अंशस्य प्रदत्त भावार्थ–त्रयात् शुद्धं भावार्थं चित्वा लिखत । **2** × **2** = **4**

प्रत्येक अंश के लिए दिये गये तीन भावार्थों में से शुद्ध भावार्थ का चयन करके लिखिए ।

Pick out and write the correct one out of the three explanations given for each of the following lines.

(i) सूत्रधारः सर्वव्यवहारस्य ।

**भावार्थ :**

(क) सकलकार्याणाम् आरम्भाय सूत्रधारः मञ्चे प्रविशति ।

(ख) प्रातः सूर्ये उदिते सति एव संसारस्य सर्वे व्यवहाराः आरम्भन्ते ।

(ग) सूत्रधारस्य सर्वः व्यवहारः मनोहरः ।

(ii) "एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ।"

**भावार्थ :**

(क) यदि कस्मिन्नपि गुणानाम् समूहः स्यात्, तर्हि तेषु गुणेषु एकः दोषः तथैव निलीयते यथा चन्द्रकिरणेषु मलिनचिह्नमपि प्रभावहीनं भवति ।

(ख) गुणसमूहे एकोऽपि दोषः भयङ्करः भवति ।

(ग) यत्र गुणाः भवन्ति तत्र एकः दोषः अपि संभाव्यते ।

**अथवा/OR**

अधोलिखितस्य पद्यस्य प्रदत्तं भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत । ½ × **8** = **4**

निम्नलिखित पद्य में दिये गये भावार्थ को मञ्जूषा में दिये गए शब्दों से पूर्ण कर पुनः लिखिए ।

Complete the central idea of the given verse with the words given in the box below and rewrite the same.

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति,
सर्वभूतेषु चात्मानम् ततो न विजुगुप्सते ।।

**भावार्थ :**

संसारे यः __(i)__ सर्वान् प्राणिनः स्वकीये __(ii)__ सस्नेहं पश्यति, अर्थात् सर्वान् जनान् __(iii)__ पश्यति, यतः सर्वे जनाः तेन सदृशाः इव । एवमेव यः सर्वेषु __(iv)__ आत्मानं पश्यति, अर्थात् एक एव __(v)__ सर्वेषु विराजते यः __(vi)__ वर्तते इति ज्ञानं जायते, तत्पश्चात् सः मानवः केनापि सह __(vii)__ कर्तुं न शक्नोति । सः __(viii)__ भवति ।

**मञ्जूषा**

| |
|---|
| हृदये, प्राणिषु, आत्मवत्, आत्मा, मनुष्यः, सर्वप्रियः, घृणाम्, मयि । |

15. अधोलिखितश्लोक**द्वयस्य** प्रदत्तान्वये उचित पदैः रिक्तस्थानपूर्तिं कृत्वा अन्वयं पुनः लिखत । ½ × **8** = **4**

निम्नलिखित **दो** श्लोकों के दिये गये अन्वयों में उचित पदों से रिक्त स्थानों की पूर्ति कर अन्वय को पुनः लिखिए ।

The prose-order renderings of the following **two** verse have been given below. Fill in the blanks and rewrite the same.

(क) अद्भिः गात्राणि शुध्यन्ति बुद्धिः ज्ञानेन शुध्यति ।
अहिंसया च भूतात्मा मनः सत्येन शुध्यति ।

**अन्वयः –**

गात्राणि अद्भिः __(i)__ । बुद्धिः __(ii)__ शुध्यति । अहिंसया __(iii)__ __(iv)__ सत्येन च शुध्यति ।

(ख) विद्यमाना गतिः येषामन्यत्रापि सुखावहा ।
ते न पश्यन्ति विद्वांसो देहभङ्गं कुलक्षयम् ।।

**अन्वयः –**

येषाम् __(i)__ अपि विद्यमाना गतिः __(ii)__ , ते __(iii)__ देहभङ्गम् कुलक्षयम् __(iv)__ पश्यन्ति ।

16. अधोलिखितानां 'क' स्तम्भस्य वाक्यांशानां 'ख' स्तम्भस्य वाक्यांशैः सह सार्थकसम्मेलनं कृत्वा वाक्यानि पुनः लिखत । **1 × 4 = 4**

निम्नलिखित 'क' स्तम्भ के वाक्यांशों का 'ख' स्तम्भ के वाक्यांशों के साथ सार्थक मिलान करके वाक्यों को पुनः लिखिए ।

Match the following sentences of column 'क' with the suitable sentences of column 'ख' and rewrite the same.

| 'क' | 'ख' |
|---|---|
| (i) एष एव अङ्गीकरोति | (अ) स्फीता भवन्त्यापदः । |
| (ii) निर्वैरा विमुखीभवन्ति | (ब) निघर्षणच्छेदनतापताडनैः । |
| (iii) तृणानि भूमिरुदकम् | (स) उत्तरं दक्षिणं चायनम् । |
| (iv) तथा चतुर्भिः पुरुषः परीक्ष्यते | (द) वाक्चतुर्थी च सूनृता । |

17. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् अर्थं चित्वा लिखत । (केवलं प्रश्न**चतुष्टम्**) **1 × 4 = 4**

निम्नलिखित वाक्यों में रेखांकित शब्दों के प्रसंगानुसार शुद्ध अर्थ चुनकर लिखिए । (कोई **चार** प्रश्न)

Select and write the appropriate meanings of the underlined words in the following sentences. (Any **four** questions)

(i) इन्दुकिरणेषु अङ्क इव ।

(क) चिह्नम्

(ख) कलङ्कः

(ग) क्रोडः

(ii) आप्तकामाः ऋषयः येन आक्रमन्ति यत्र तत् सत्यस्य परमं निधानम् –

(क) आश्रयः

(ख) मुख्यम्

(ग) कोषः

(iii) सत्त्वं च न परिभ्रष्टं यद् दरिद्रेषु दुर्लभम् ।

(क) सात्त्विकः

(ख) मनः

(ग) जीवः

(iv) वेदा एतस्य एव वन्दिनः ।

(क) स्तुतिगायकाः

(ख) स्नेहिनः

(ग) मानिनः

(v) यथा चतुर्भिः कनकं परीक्ष्यते ।

(क) सुवर्णम्

(ख) पुष्पम्

(ग) कर्णः

**खण्डः घ (SECTION D)** **10 अङ्काः**

**भाग – II**

**PART – II**

**सामान्यः संस्कृतसाहित्यपरिचयः**

**सामान्य संस्कृत साहित्य परिचय**

**General Introduction to Sanskrit Literature**

18. (अ) अधोलिखितेषु कस्यापि **एकस्य** कवेः संक्षिप्तः परिचयः संस्कृतेन लेख्यः । **5**

निम्नलिखित में से किसी **एक** कवि का संक्षिप्त परिचय संस्कृत में लिखिए ।

Write a brief note on any **one** of the following Part in Sanskrit.

(i) भारविः

(ii) भर्तृहरिः

(iii) कालिदासः

**अथवा / OR**

अधोलिखितेषु वाक्येषु मञ्जूषा पद–साहाय्येन रिक्तस्थानानि पूरयित्वा पुनः लिखत । **½ × 10 = 5**

निम्नलिखित वाक्यों में मञ्जूषा के पदों की सहायता से रिक्त स्थानों की पूर्ति कर पुनः लिखिए ।

Fill in the blanks in the following sentences using the words from the box and rewrite the same.

(i) नाटकं __________ एव एकः भेदः ।

(ii) नाट्यशास्त्रस्य रचयिता __________ आसीत् ।

(iii) कालिदासस्य ___________ प्रसिद्धा ।

(iv) छन्दोरहितरचना __________ कथ्यते ।

(v) पञ्चतन्त्रस्य लेखकः _________ अस्ति ।

(vi) गद्यपद्यमयी रचना _______ इति कथ्यते ।

(vii) _______ आख्यायिका च गद्यकाव्यस्य प्रमुखं भेदद्वयम् ।

(viii) नाटकस्य अन्ते __________ भवति ।

(ix) रसाः __________ भवन्ति ।

(x) छन्दोयुक्तरचना __________ कथ्यते ।

**मञ्जूषा**

| |
|---|
| उपमा, रूपकस्य, भरतः, पद्यम्, चम्पूः, गद्यम्, विष्णुशर्मा, कथा, भरतवाक्यम्, नव |

(आ) महाकाव्यस्य काश्चन पञ्चविशेषताः संस्कृतेन लिखत । **5**

महाकाव्य की किन्हीं **पाँच** विशेषताओं को संस्कृत में लिखिए ।

Write any **five** characteristics of Mahakavya in Sanskrit.

__________

BVMI/1 EXAMINATION 2019 • BVMI/1 EXAMINATION 2019 • BVMI/1 EXAMINATION 2019

तत् त्वं पूषन् अपावृणु

केन्द्रीय विद्यालय संगठन


**केन्द्रीय विद्यालय संगठन**

**KENDRIYA VIDYALAYA SANGATHAN**

18, संस्थागत क्षेत्र, शहीद जीत सिंह मार्ग, नई दिल्ली-110016

18, Institutional Area, Shaheed Jeet Singh Marg, New Delhi-110016

Website : www.kvsangathan.nic.in

@KVSHQ @KVS_HQ



**DESIGNED & PRINTED BY :**
CHOUDHARY PRINTING PRESS, Near Mohanpur Devisthan, Punaichak, Patna-800 023
Mob. : 09430906087, 07903299242, T/F: 0612-2546751
E-mail -choudharyprintingpress@gmail.com, Website : www.choudharyprintingpress.com